SEMUSHI

# शेमुषी

Volume - XV /ISSUE - 1 *Bi-monthly News Letter* DEC-2018 TO JUNE-2019

वाचस्पतिं विश्वकर्माणमूतये मनोजुवं वाजे अद्या हुवेम।
स नो विश्वानि हवनानि जोषद्विश्वशम्भूरवसे साधुकर्मा।। (ऋग्वेद: १०.८१.७)

***Let us, this day, invoke for our protection of the Lord of Speech, the Creator of all, who is swift as thought; may He, the Bestower of all happiness, the doer of good works, be propitiated by all our oblations, (so as) to grant us his protection. (Rgveda 10.81.7)***

मान्यवरप्रधानमन्त्रिणां नेतृत्वे संघटिते मन्त्रिमण्डले
मानवसंसाधनविकासमन्त्रालयस्य
नवनिर्वाचितेभ्य: मन्त्रिवर्येभ्य:
श्रीमद्भ्य: रमेशपोखरियालनिशङ्कमहोदयेभ्य:
राष्ट्रियसंस्कृतविद्यापीठपक्षत: शुभाभिनन्दनानि ।





महामान्यप्रधानमन्त्रिवर्येभ्य:
श्रीमद्भ्य: नरेन्द्रदामोदरदासमोदिमहोदयेभ्य:
तेषां द्वितीयवारं प्रधानमन्त्रित्वेन निर्वाचनसन्दर्भे
राष्ट्रियसंस्कृतविद्यापीठपक्षत:
अभिवन्दनानि अभिनन्दानि च।

राष्ट्रियसंस्कृतविद्यापीठम् :: तिरुपति:

**RASHTRIYA SANSKRIT VIDYAPEETHA**

**(Deemed to be University)**
**Accredited with CGPA of 3.71 on 4 point scale by NAAC (Cycle-2)**
**Categorized in 1st Category among Indian Deemed Universities by the UGC**
**Tirupati, Andhra Pradesh**
**PIN - 517 507**

## मान्यमानवसंसाधनविकासमन्त्रालयमन्त्रिभि: श्रीरमेशपोखरियालनिशङ्कैः सह विद्यापीठस्य विकासाय कुलपतीनां विचारविमर्श:






मानवसंसाधनविकासमन्त्रालयस्य नवनियुक्तैः मन्त्रिभिः **श्रीरमेशपोखरियालनिशङ्कमहोदयैः** सह साक्षात्कारं विधाय अभिनन्दन्तः विद्यापीठस्य कुलपतयः **आचार्य वि.मुरलीधरशर्ममहोदयाः**



महामान्यकुलाधिपतिभिः **श्रीनीडामङ्गलं गोपालस्वामिमहोदयैः** सह भगवद्रामानुजाचार्यग्रन्थप्रकाशनप्रकल्पसन्दर्भे भाषमाणाः कुलपतयः तथा प्रकल्पाध्यक्षाः **आचार्य का.ई.देवनाथन्** महोदयाः तथा अन्ये प्रकल्पसंयोजकाः कर्मचारिणश्च ।

सत्यं चेत्तपसा च किम् (If there is truth, where is the need of penance ?)



# ।। कुलपतिसन्देशः ।।



## संस्कृतं प्राविधिकञ्च
## (Sanskrit and Technology)

अद्यत्वे प्राविधिकस्य महन्महत्त्वं दरीदृश्यते लोके । दैनन्दिनकार्येषु, वार्तासम्प्रेषणे, यात्रादिषु, मनोरञ्जने, शिक्षादिरङ्गेषु, अनुसन्धानक्षेत्रे, वाणिज्ये, व्यवसाये किम्बहुना जीवनस्य प्रत्येकस्मिन् क्षेत्रे एतन्माहात्म्यं वरीवर्ति ।

यस्य प्रभावः जीवनस्य प्रत्येकस्मिन् क्षेत्रे तत्तादृशस्य प्राविधिकस्य संस्कृतक्षेत्रेऽपि उपयोगः क्रियमाणोऽस्ति इत्यत्र नातिशयोक्तिः । प्राचीनसंस्कृतवाङ्मयस्य संरक्षणे, सम्प्रेषणे, संवर्धने तथा संस्कृतशिक्षणसरण्यां, योगशिक्षणे अन्यत्र च अस्योपयोगिता शनकैः वर्धमानाऽऽस्ते ।

परन्तु संस्कृतभाषा सर्वजनादृता स्यात् । निखिलमपि संस्कृतवाङ्मयं सर्वजनान् प्राप्नुयात् इत्युदात्तदृष्ट्या नैके संस्कृतक्षेत्रे कार्यं कुर्वाणाः बुद्धिजीविनो न चिन्तयन्तीति खेदावहो विषयः ।

लक्षशः अमूल्याः तालपत्रग्रन्थाः हस्तलिखितग्रन्थाश्च नैकेषु ग्रन्थालयेषु, विविधेषु पुरावस्तुसंग्रहालयेषु, गृहेषु च जीर्णाः शीर्णाश्च जायमानास्सन्ति । प्राचीनभारतीयज्ञानसन्दायस्य (Ancient Indian Knowledge Heritage) ईदृशरीत्या नाशनापेक्षया लोकोपकारार्थं प्राविधिकोपयोगेन तत्सम्पादनप्रकाशनादिभिः बहिरानयनं वरम् । एवं करणेन विविधस्थलेषु विविधरूपेण च अस्मदमूल्यसन्दायोऽयं सुरक्षितो भवति ।

विशिष्य संस्कृतभाषायाः, तद्वाङ्मयस्य च विकासः तच्छिक्षणमुपजीवति । अतो हेतोः संस्कृत-भाषायाः तन्निष्ठवाङ्मयस्य च प्रभाविप्रचारार्थं संस्कृतं विश्वपटले प्रतिष्ठापनीयम् । तदर्थं प्राविधिक-माधिक्येनोपयोक्तव्यम् । अस्मद्विद्यापीठमेतद्दिशि शनैरग्रेसरति, सर्वसंस्कृतसंस्थानामपेक्षया अग्रेसरिष्यतीति च मम द्रढीयान् विश्वासः ।

(वि.मुरलीधरशर्मा)

शुचि मनो यद्यस्ति तीर्थेन किम् ? (If there is nobility, where is the necessity for a retinue?)

# आलेख्यवार्ता:

**नेपालदेशे भारतीयदूतावासपक्षत: २०१९ वत्सरस्य मार्चमासे १९-२० दिनाङ्कयो:**
**“Sanskrit : A common treasure for India and Nepal” इति विषये समायोजितान्ताराष्ट्रियसम्मलने**



भाषमाणा: विद्यापीठस्य कुलसचिवा:
आचार्य जि.एस्.आर्.कृष्णमूर्त्तिमहोदया:



भाषमाणा: विद्यापीठस्य साहित्यविभागाध्यापक:
डा.भारतभूषणरथमहाभाग:



मान्यै: कुलपतिभि: सम्मान्यन्ते श्रीवेङ्कटेश्वरचिकित्साविज्ञानकेन्द्रस्य कुलसचिवचरा: **आचार्य वि.एस्.आर्.आञ्जनेयुलुमहाभागा:**



राष्ट्रियसंस्कृतविद्यापीठ-केन्द्रसाहित्याकादमीपक्षत: समायोजिते सम्मेलने कुलपतिभि: सम्मानिता: कविकुलगुरुकालिदास-संस्कृतविश्वविद्यालयस्य कुलपतिचरा: आचार्य उमावैद्यमहाभागा:



कुलपतिभि: सत्कृता: तिरुपतिस्थश्रीपद्मावतीमहिलाविश्वविद्यालयस्य आचार्या **आचार्यश्रीकोलाकालुरीमधुज्योतिमहाभागा:**



कुलपतिभि: सम्मानिता: संस्कृतस्य वरिष्ठा: विद्वांस: महामहोपाध्याया: **आचार्या: समुद्राललक्ष्मणय्यामहोदया:**





# मूलाम्नायश्रीकाञ्चीकामकोटिपीठाधीश्वराणां विद्यापीठे अनुग्रहभाषणम्



परमपूज्य-श्रीचन्द्रशेखरेन्द्रसरस्वती-श्रीजयेन्द्रसरस्वती-श्रीचरणकरकमलसञ्जाता: अखण्डतपोनिष्ठा:, संयमीन्द्रा: मूलाम्नायश्रीकाञ्चीकामकोटिपीठाधीश्वरा: **श्री श्री श्री शङ्करविजयेन्द्रसरस्वतीश्रीचरणा:** विद्यापीठस्य कुलपतीनां प्रार्थनां स्वीकृत्य श्रीवेङ्कटेश्वरस्य चरणकमलतले विद्यमानं परमपावनप्राङ्गणं समागत्य आशीर्भि: सर्वान् अन्वग्रहीषु: । इमे अद्यावधि संस्कृतभाषासमुद्धरणाय शास्त्राणां संरक्षणाय च विद्यापीठेन कृतस्य कार्यजातस्य श्लाघनमकुर्वन्, इतोऽपि करिष्यमाणस्य कार्यस्य समृद्ध्यर्थम् इतिकर्तव्यतां च समसूचयन् । स्वानुग्रहभाषणे इमे संस्कृतभाषाया: मातृभाषायाश्च प्रभावं प्रदर्श्य समुद्रनदीदृष्टान्तेन विद्यार्थिन: प्राबोधयन् । अन्ते सर्वेषां पण्डितानां सम्माननं कृत्वा विद्यापीठमन्वगृह्णन् । कुलपतीनामाध्यक्ष्ये **आचार्य गणपतिभट्टमहोदया:** कार्यक्रममम‌ुं समचालयन् ।

## पूज्यश्रीचरणानां कृते समर्पिता स्वागताभिवन्दनश्लोकरत्नमालिका

विद्यापीठं प्रति करुणया रक्षकान् सद्गुरून् व:
श्रीमद्विद्याबहुकलनया भासुरान् देववर्यान् ।
आचार्या वा कुलपतिमुखा छात्रसङ्घायुक्ता:
प्रीत्या भक्त्या मधुरवचसा स्वागतं व्याहराम: ।। १ ।।

जयेन्द्रशिष्यरत्नकामकोटिभूषण !
चन्द्रमौलिपूजक ! शिष्यकोटिसंयुत ! ।
शङ्करार्यधर्ममान्यसंयमीन्द्रशङ्कर !
स्वागतं स्वागतं विद्यया विभूषित ! ।। २ ।।

ये सदा दर्शनेन सन्ततं मुदावहं
प्राप्नवाम सर्वदा शिष्यरेणवो वयम् ।
ज्ञानराशिनिधान ! हे जगद्गुरो नमोऽस्तु ते
स्वागतं स्वागतं विद्यया विभूषित ! ।। ३ ।।

द्राक् सदा शुभागमेन तोषिता मानवा:
द्वैतभावनाऽपि नैव सर्वदा न चास्ति न: ।
दर्शनेन श्रीमतां विवेकिनो भवम हे !
स्वागतं स्वागतं विद्यया विभूषित ! ।। ४ ।।

सदा मुदा हृदा परं मोद एव जायते
त्वदीयपादपङ्कजे रतिस्सदाऽस्तु सद्गुरो ।
वीक्षणेन भाषणेन सदा मुदं वहाम हे !
स्वागतं स्वागतं विद्यया विभूषित ! ।। ५ ।।

रम्यदर्शनं वचोभूषणं सुभूषणं
नमोवाकशतं गुरो सरस्वतीपदे तव ।
अर्पयाम वन्दनानि जयं सदा वदाम हे !
स्वागतं स्वागतं विद्यया विभूषित ! ।। ६ ।।

स्वागतेन भाषणेन चार्चयाम शङ्कर !
कर्णपेयभाषणेन पूजनं च कुर्महे ।
विशालनेत्रपातनेन रक्ष रक्ष शङ्कर !
स्वागतं स्वागतं विद्यया विभूषित ! ।। ७ ।।

तिग्मरोचिषा सदा कदाऽपि नैव पश्य हे !
शीतमन्दविस्मितै: कृपाकटाक्षवीक्षणै: ।
रक्ष रक्ष सतां मुदं जीवनं प्रदीपय
स्वागतं स्वागतं विद्यया विभूषित ! ।। ८ ।।





# द्वाविंश: दीक्षान्तसमारोह:

## दिनाङ्क: - ०९.०२.२०१९



दीक्षान्तसमारोहसभाङ्गणे वैदिकप्रार्थनारता: कुलाधिपतिसमेता: अतिथय:

राष्ट्रियसंस्कृतविद्यापीठस्यास्य द्वाविंश: दीक्षान्तसमारोह: महता वैभवेन 09.02.2019 तमे दिनाङ्के विद्यापीठान्तेवास्यध्यापकसमेतानां कुलाधिपति-कुलपति-विशिष्टातिथि-प्रबन्धपरिषत्-विद्वत्परिषत्-सदस्यानां समुपस्थितौ महता वैभवेन समायोजि । महोत्सवस्यास्य शुभारम्भ: विद्यापीठप्राङ्गणे शैक्षिकभवनात् शोभायात्रया प्रारभ्यत । वेदिकायां वैदिकप्रार्थना, विद्यापीठप्रार्थना, कुलाधिपतीनां दीक्षान्त-समारोहस्यारम्भोद्घोषणम्, कुलपतीनां स्वागतभाषणम्, मुख्यातिथीनां दीक्षान्तसन्देशभाषणम्, कुलाधिपतीनामध्यक्षभाषणम्, त्रयाणां पण्डितप्रकाण्डानां लब्धयशस्कानामाचार्याणां कृते महामहोपाध्यायोपाधिप्रदानम्, द्वयो: विद्वद्वरेण्ययो: कृते वाचस्पत्युपाधिप्रदानम्, स्नातकानां कृते उपाधिप्रदानमित्यादय: नैके कार्यक्रमा: क्रमश: समायोज्यन्त । ऐषम: समारोहेऽस्मिन् एकोनषष्टिसंख्याका: (59) शोधोपाधिधारिण: विद्यावारिधिस्नातका:, द्वात्रिंशत्संख्याका: (32) विशिष्टाचार्यस्नातका: ; चत्वारिंशदुत्तरद्विशतसंख्याका: (240) आचार्यशिक्षाचार्य-स्नातका:, एकोनषष्ट्युत्तरद्विशतसंख्याका: (२५९)शास्त्रि-बि.ए.-बि.एस्.सि.-शिक्षाशास्त्रिच्छात्रा:, एकविंशति: (२१) स्वर्णपदक-भाजश्च स्नातका: वैदिकानुशासनपठनपूर्वकं सम्मानिता अभूवन् । राष्ट्रगीतेन सह सभाया: स्वस्तिवाचनिकमभूत् ।

## मुख्यातिथीनां न्यायाधीशानां श्री एल्.नरसिंहरेड्डिमहोदयानां दीक्षान्तभाषणसार:

१९६१ तमे वर्षे प्रतिष्ठापितमिदं विद्यापीठं कथं साफलस्य औन्नत्यमगादिति एकां दृष्टिं प्रसारयाम: । विद्यापीठस्य आधारशीलास्थापने डॉ.सर्वेपल्ली राधाकृष्णन्-अपेक्षया कोऽन्य: युक्ततर: स्यात् ? ते तु शिक्षणे, अध्ययने, तत्त्वशास्त्रे च नितरां प्रथिता: । ते भारतीयसंस्कृते: प्रतिनिधिभूता: तथा त्रिकरणपूर्वकं तस्या: प्रचारका:, अपि च संस्कृतभाषाया: प्रशंसका आसन् । विद्यापीठस्यास्य स्थापनेन तेषां स्वप्नस्तथा मनीषा च साफल्यम् अवापेति तैरवश्यं चिन्तितं स्यादित्यहं विश्वसिमि । विद्यापीठस्यास्य साफल्यमस्माभि: अक्षिसात्कृतमेव । गच्छता कालेन बहूनां महतामागमेन विद्यापीठस्य वैभवं वर्धमानं लक्ष्यते ।

प्रायश: भाषासम्बद्धास्तथा संस्कृतसम्बद्धाश्च संस्था: तासां स्थित्या तथा विना प्रतिबन्धकमनुवृत्त्या च तृप्ता: भवन्ति । तस्मात्कारणात्संस्कृतक्षेत्रे बह्व्य: संस्थापिता अपि निरीक्षितमौन्नत्यं नावापु: । परन्तु विद्यापीठमिदं मूल्याङ्कनविषये न केवलं तान्त्रिक-वैज्ञानिकसंस्थाभि: सह स्पर्धते, किन्तु ता अतिशेते । अन्योऽपि विषय: प्राधान्यं भजते यत् यद्यपि संस्कृतस्य कृते एव बह्व्य: संस्था: स्थापिता:, तथा विश्वविद्यालयेषु संस्कृतविभागा: तदवि-भाज्यतां गता: तथापि कुत्रापि अध्ययनादिकं न संस्कृतमाध्यमेन भवति । संस्कृतग्रन्थानामनुवादमात्रं स्वीक्रियते । केवलं तत्रत्यसारमात्रम् आङ्ग्लभाषायामन्यासु भाषासु वा अध्याप्यते तथैव संस्कृतेतरमाध्यमेन परीक्षा चाल्यते । एतादृशसंस्थाभि: शिक्षिता: संस्कृतेतरविषयाभिज्ञापेक्षया न भिद्यन्ते । एतादृशापूर्ण-मनस्कप्रयत्नै: प्राचीनाया: देवभाषाया: विषये अन्याय्यमेव आचरितम् । तौलनिकदृष्ट्या पश्यामश्चेत् संस्कृतविद्यापीठमिदम् अन्वर्थाभिधानम् । अत्र शिक्षाप्रणाली एवं विरचिता यथा संस्कृतभाषाया: अभिवृद्धि: तथा अध्येतु: ज्ञानाभिवृद्धिश्च स्यात् । संस्कृतसौगन्धमत्र स्फुरति । अत्रत्यं वैभवमेव साक्षी । अत्रत्य-शिक्षणस्तर: तथा गुणवत्ता च इतरसंस्थापेक्षया भिद्यते । एतादृश- संस्थोत्पन्नानां छात्राणां स्तर एव भिन्नो भवति ।

किं करोत्येव पाण्डित्यमस्थाने विनियोजितम् ? (Of what avail is the learning imaprted to an unworthy person)



भारतस्य स्वातन्त्र्यप्राप्त्यनन्तरं भारतीयशिक्षणपद्धतौ संस्कृतस्य प्राधान्यं न्यूनीकर्तुं तथा सम्पूर्णतया निष्कासयितुं च उद्देशपूर्वक: प्रयत्न: कृत इति मे मति: । बाह्यानां प्रशासनकाले तद्दिशि बहव: प्रायतन्त । तथापि तेषु दिनेषु सर्वकारेण असम्बद्धा: गुरुकुलादिरूपा: संस्था: वर्धमाना या आसन् तत्कारणादेव इदानीमपि संस्कृतं तथैव वरीवर्ति । संस्कृतं भारतीयानाम् अविभाज्यमङ्गमात्रं न, किन्तु बहून् वैदेशिकानपि आकर्षति स्म । अनतिदूरे काले आङ्ग्लेया: उच्चन्यायालयन्यायाधीशा:, भारते कार्यमग्ना: भारतीयस्मृतिषु प्रतिपादिततत्त्वानां ज्ञानार्थं संस्कृताध्ययनं गौरवार्हमिति मन्यन्ते स्म ।

स्वातन्त्र्यप्राप्त्यनन्तरं शैक्षणिकी परियोजना तादृशानां पर्यवेक्षणे उद्देश्यपूर्वकं स्थापिता ये भारतीयसंस्कृते: सर्वथा विरुद्धा: आसन् । तत्रापि विशेषत: संस्कृतविषये । पाठशालास्तरे तथा महाविद्यालय-स्तरे च संस्कृतस्य तथा भारतीयसंस्कृतेश्च साङ्गत्यं यथा न स्यात् तथा उद्देशपूर्वक: सकल: प्रयत्न: विहित: । भारतीयानां सर्वथा अनपेक्षिता: विषया: शिक्षणं समानीता: । उदाहरणार्थं ब्रूम: — अस्माकम् अध्ययनाध्यापनक्षेत्रे विशिष्य गणिते आर्यभट्टस्य, शस्त्रचिकित्सायां सुश्रुतस्य, वैद्ये चरकस्य, अर्थशास्त्रे तथा राजनीतौ च चाणक्यस्य, व्याकरणे पाणिने:, मीमांसायां जैमिने:, नागार्जुनस्य रसायनशास्त्रे इत्येतेषां विचार: अध्ययनप्रणाल्यामासीत् । तेषां रचना:, कृतय: अत्युच्चश्रेण्यां परिगणिता: आसन् । ऐन्स्टीन्प्रमुखा: महान्त: विज्ञानिन: अपि गणितविषये भारतीयानां योगदानं तत्रापि शून्यसंख्यापरिकल्पनं विज्ञानस्य अभिवृद्ध्यै बहूपकरोतीति अङ्गीकुर्वन् । परन्तु इदानीन्तनशिक्षणपुस्तकेषु एतेषां नामान्यपि न दृश्यन्ते । अपि तु मेगास्तनीस्-कोलम्बस्-मार्कोपोलो-अलेग्साण्डार्-प्रमुखानां विषये शिक्षा दीयते । अत: क्रमश: अस्मदीया: अस्माकं संस्कृतस्य सकाशाद् दूरं गता: ।

भारतीयेतिहासस्तु नितरामन्यथायित: । अत्यन्तं महत्य: ऐतिहासिकघटना: अस्मद्देशसम्बद्धा: इतिहासे अन्तर्भाविता: अथवा विकृतिं यापिता: । परन्तु अस्माकमुपरि आक्रमणं ये कृतवन्तस्ते महान्त इति प्रादर्शयन् । किञ्च अशान्तमनस्कतया पराजितान् अपि विजयिन इति प्रदर्शयामासु: इतिहासे । परमहंस-योगानन्दप्रणीतं कस्यचिद्योगिन: आत्मचरित्रं पश्यामश्चेत् ज्ञायते यत् अलेक्सण्डार्-महाशय: भारतदेशस्य




परिधिं प्राप्य देशस्यास्य उपरि आक्रमणचिन्तामेव तत्याज, प्रत्युत अत्रत्यया अध्ययनपद्धत्या तथा संस्कृत्या प्रभावित: इत: प्रतिनिवर्तितुमना: स्वेन सह कांश्चन विदुष: स्वीकृत्य गन्तुमैच्छत् । एतत्सम्बद्धं सर्वं त्विवरणम् इटलीदेशस्थानि आधिकारिकपुस्तकानि आधृत्य दत्तम् । परन्तु दौर्भाग्यादस्माकमितिहासकारैर्यल्लिखितं तत्सर्वं विकृतस्वरूपमेव।

अस्मान् परित: किं भवतीति अज्ञात्वैव स्वातन्त्र्यसङ्ग्राम- सम्बद्धा: विषया: तथा योद्धार: इतिहासे नैव निर्दिष्टा: । उदाहरणार्थं ब्रूम:, यत् जितेन्द्रनाथघोष: सत्याग्रहं कुर्वन् स्वस्य मरणपर्यन्तमपि आहारं न स्वीचकार । महात्मगान्धिमहोदयस्य आह्वानमङ्गीकृत्य २९ तमे वयसि सत्याग्रहमारेभे । यदा बद्ध: कारागारे स्थापितश्च, स: तत्रापि उपवासं कृत्वा तत: २९ तमे दिवसे लाहोर्कारागारे ममार । सुभाष् चन्द्र बोस् महोदय: कलकत्तानगरं प्रति तस्य शवमानेतुं लाहोर्-कारागारं गत इति ज्ञायते । तस्य आनयनमार्गे यावान् जनसंमर्द आसीत् तावान् अन्यत्र कुत्रापि एतावत्पर्यन्तं नासीदिति प्रतीयते । किन्तु एतादृशमहापुरुषस्य विषये अस्माकमितिहासपुस्तकेषु कुत्रापि न उल्लिखितोऽस्ति, नापि छात्रा: अध्याप्यन्ते । दशकेभ्य: बहुजागरूपकतया भारतीयवैभवस्य संस्कृतेर्वा अन्याय्येन अवमानाय विषया: विचिन्त्य संयोजिता: ।

संस्कृतभाषाया: महत्त्वं तु शाश्वतिकं निरुपमञ्च । ये तावत्संस्कृतविषये किञ्चिद्वा जानन्ति ते अवश्यमन्यै: किं न प्राप्तमिति जानन्ति । इयमेव एका भाषा यस्यां वाक्यस्थपदानां कालवचनलिङ्गादिस्वरूपज्ञाने जाते सति






उदारचरितानां तु वसुधैव कुटुम्बकम् (The magnanimous, on the other hand, regard the whole as their own family.)

वाक्यस्थपदानामितस्ततो विपरिणामः सुशकः । अन्यस्यां कस्यामपि भाषायामेतत्सौकर्यं नास्तीति मे मतिः । मानुषबुद्धेः "घनपाठः", "जटापाठश्च" एकमसाधारणं कर्म । सहस्रेभ्यः वर्षेभ्योऽनया पद्धत्या एव वेदस्य संरक्षणमभवत् ।

संस्कृतसम्भाषणेनैव मनुष्यस्य संस्कृतिरभिवर्द्धते । प्रत्येकमपि पदस्योच्चारणम्, स्पष्टता, अर्थशुद्धता, वाक्यरचनाक्रमः, मनसः संलग्नता इत्यादिकं मनुष्यस्य ज्ञानाभिवर्धकं तथा तस्य चिन्तनस्यापि अभिवर्द्धकम् । संस्कृते असम्मतिप्रदर्शनमपि गौरवास्पदमेव क्रियते । संस्कृतभाषायां सम्भाषणं तु तद्भाषिणां गौरवास्पदं भवति । प्रतिपदं संस्कृतस्य वैभवम्, संस्कृतेश्च प्राधान्यं तद्भाषायां प्रतिबिम्बते ।

व्याकरणं तथा काव्यरचनेति द्वयमध्ययने उच्चकोटिकं भवति । उत्तमाः कवयः तथा विद्वांसश्च नृपैः सम्मानिताः । राज्ञां राजवैभवे कवीनां तथा पण्डितानामपि अंशः वर्तत इति तु नातिशयोक्तिः । इतिहाससंरचना-क्रममाश्रित्य यदि वयं पश्यामस्तर्हि ज्ञायते यत् प्रत्येकमपि राज्ञः प्रशासनसमये कवयः पण्डिताश्च सम्मानिताः, तथैव तेषु कालेष्वे उच्चस्तरीयसाहित्यविकासः समजनीति। विचारावसरे पूर्वपक्षः तथा उत्तरपक्ष इति क्रमेण विचारः अत्युच्चस्थानं प्राप्य निष्कर्षः जायते ।

यद्यपि भाषाविषये निपुणमतीनां सम्माननाय इदानीमपि अस्ति मार्गस्तथापि तत्र मानक्रमः भिद्यते, तथैव उच्चपदेषु विद्यमानानां मानसिकी स्थितिः कलुषिता प्रायशः । तस्यैव फलं यत्तादृशसंस्थाः तानेव सम्मानितवत्यो ये अस्माकं संस्कृतेस्तथा संस्कृतस्य विद्वेषिणः । यदा एतादृशपरिस्थितेः परिवर्तनाय प्रयासः आरभ्यते, तदा असहनशीलतायाः कल्पना पुरतस्समानीता ।

अपरेयं महत्ता संस्कृतभाषायाः द्वुरुशिष्ययोः सम्बन्धं विवृणोति इति । **"गुरुर्ब्रह्मा, गुरुर्विष्णुः, गुरुर्देवो महेश्वरः"**, तथा शिष्यः तस्य परिवारे एकः सदस्यः । प्रार्थनायामपि शिष्यः गुरोः वृद्धिं (रक्षणं) कामयते – **"अवतु माम्, अवतु वक्तारम्"** इति । गुरुः साक्षाच्छिष्यमनुगृह्णाति । **"सहनाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्विनावधीतमस्तु मा विद्विषावहै ।"** इत्ययं मन्त्रः गुरुशिष्यसम्बन्धं परिचाययति ।

भारतीयशिक्षणपद्धतौ अध्यापनं न वाणिज्यदृष्ट्या, न वा छात्रस्य जीविकानिर्वहणार्थं सज्जीकरणीयम् । परन्तु इदं शिक्षणं सम्पूर्णजीवन-निर्वहणाय । अध्ययनसमाप्तिसमनन्तरं "स्नातकोत्सवः" अर्थात् दीक्षान्तसमारोहो भवति । तैत्तिरीयोपनिषदः शिक्षावल्ल्यां स्नातकोत्सव-सन्दर्भे गुरुकुलात् प्रतिनिवर्तमानानां छात्राणां कृते दीयमानः उपदेशः अन्तर्गतः । यथा — "मातृदेवो भव । पितृदेवो भव । आचार्यदेवो भव । अतिथिदेवो भव । सत्यं वद । धर्मं चर ।" इत्यादयः । तथैव यानि कर्माणि कर्तव्यानि, यानि च न कर्तव्यानि इत्यपि । तस्य छात्रस्य मातापित्रोः विषये, समाजस्य विषये, प्रकृतिविषये कथमाचरितव्यमित्यप्युपदिष्टम् । महोन्नत-संस्कृतिरेषा एतादृशवैभवोपेतस्नातकोत्सवस्तरात् उच्चस्तरीय-संस्थासु प्रचलमानेषु इदानीन्तनस्नातकोत्सवेषु उष्णीषक्षेपणपर्यन्ता अधोगतिं प्रापिता । एतादृशस्नातकोत्सवः नैव विरलः । स्वार्थाभिभूत- मनोवृत्तिकः, भावनानामुन्मत्ततारूपेण प्रदर्शनपटुकः छात्रः तादृश- विद्यालयाद् बहिरागच्छति चेत् अवशिष्टजीवने सः एतद्भिन्नरूपेण आचरतीति निरीक्षितुं न शक्यते ।

एतादृशस्वभावनिरोधने न केवलमाशाज्योतिरिव, किन्तु प्रदीपगृहमिव अथवा मार्गदर्शकनक्षत्रमिव अन्यासां संस्थानां विद्यापीठमिदं राराज्यते यद् दृष्ट्वा अन्यस्मिन् मार्गे गच्छन्त्योऽपि संस्थाः सफलशिक्षाप्रणालीं प्राप्तुं परावृत्य पश्यन्ति ।

न केवलं भारतीयाः, अपि तु प्रपञ्चे विद्यमाना बहवो जनाः संस्कृताध्ययने अभिरुचिमावहन्ति । संस्कृतस्य कृते एव केचन विश्वविद्यालयाः स्थापिताः, कुत्रचिद् विभागाः तथा स्थानानि च स्थापितानि । आधुनिकसंवाहकतन्त्रज्ञानेन शिक्षणपद्धतिः सरलीकृता, यदि अस्याः वेगः वर्धते तर्हि संस्कृतं प्राक्तनवैभव- मचिरादेव सम्प्राप्य भारते अवश्यं विश्वगुरुत्वेन आविर्भविष्यति । प्रान्तस्वार्थभेदेन विभक्तेऽस्मिन् प्रपञ्चे जनाः भारतीयसंस्कृतौ तथा वक्ष्यमाणोपदेशेषु शान्तिं प्राप्नुवन्ति । तद्यथा —

**सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत् ।।** इति ।

अन्यभाषाध्ययनमिव संस्कृतभाषाध्ययनं न भाषाज्ञानमात्र- जनकम् । स्वस्येच्छानुसारेण जिज्ञासुः प्राचीनानां कृतीनां विषये यदि विहङ्गमदृष्टिं प्रसारयति तदा अद्भुतानि फलानि प्राप्नोति । अस्मिन् विषये पुनः विद्यापीठमिदं प्राचीनहस्तलिखितमातृकाणां तथा अन्येषां पुस्तकानां संरक्षणद्वारा महदुपकारं करोति । अहं तु संस्कृतविषये अर्धपक्वेन मदीयसंस्कृतज्ञानेन भवतां सहनशक्तिं परीक्षितुं नोत्सहे । तिरुपतौ वेदपाठशालायां जातामेकां घटनां श्रावयामि । एकः दूरदर्शनकार्य-क्रमायोजकः केषाञ्चिच्छात्राणां साक्षात्कारं कृत्वा परिसरस्यापि चित्रग्रहणमकरोत् । तत्रत्याः छात्राः साम्प्रदायिकवस्त्रविभूषिता आसन् । परन्तु दूरदर्शनकार्यक्रमा- योजकस्य मनस्येवं भावनाऽऽसीत् यदेते विद्यार्थिनः प्रापञ्चिक- भोगवञ्चिताः, यतो हि तेषां क्रीडने, चलनचित्रदर्शने, आकर्षक- वस्त्रधारणे तथा तत्परिसराद् बहिः उपलभ्यमानविषयेषु अवकाशो नासीदिति मत्वा तेषां विषये खिन्नः । यदा सः एकं विद्यार्थिनमपृच्छत् अन्यविद्यार्थिनः समाजे एतादृशविषयेषु अवकाशं लभन्ते तथा भवतां नास्ति किम् ? इति पृष्टे विद्यार्थी अवदत् यत् अस्मदपेक्षया अन्ये विद्यार्थिन एव समाजे एतादृशात् अत्युत्तमावकाशात् वञ्चिताः यत्र जीवनमौल्यं शिक्षितं भवति वेदपाठशालासु इति । दूरदर्शन-कार्यक्रमायोजकः एतच्छ्रुत्वा आश्चर्यचकितो बभूव । सुप्रतिष्ठितात् अस्मात् ये विद्यार्थिनः उपाधिं स्वीकुर्वन्ति ते स्वजीवने सर्वेषु विषयेषु यशोभाजनानि सफलाश्च भवन्तु । भवन्तः सर्वे, यानि जीवनमूल्यानि यदर्थं च विद्यापीठमिदं प्रथितं तानि अनवद्यानि कर्माण्येव कुर्वन्ति न तु तदितराणि इति विश्वसिमि ।

**।। सर्वे भवन्तु सुखिनः ।।**

संहतिः श्रेयसी राजन् (Oh king ! Union with one's kinsmen is beneficial)



# महामान्यकुलाधिपतीनामाध्यक्ष्यभाषणसारः



दीक्षान्तसमारोहस्यास्य अध्यक्षाः महामान्याः कुलाधिपतयः पद्मभूषणोपाधिसम्मानिताः श्रीनीडामङ्गलं गोपालस्वामिमहोदयाः दीक्षान्तकार्यक्रमस्योद्घाटनमकार्षीत् । सन्दर्भेऽस्मिन् सर्वप्रथममस्य विश्वविद्यालयस्य केन्द्रीयविश्वविद्यालयत्वेन परिणमने समयसाध्यम् उपक्रमं कुर्वद्भ्यः विश्वविद्यालस्य अस्य कुलपतिभ्यः सहकारिभूतेभ्यः कर्मकरेभ्यश्च शुभाभिनन्दनं वितीर्य संस्कृतस्य साम्प्रतिकस्थितिं च प्रघटीकृत्य विश्वविद्यालयस्य बहुविधोन्नतिमूलककार्यक्रमान् अववर्णत् । यथा — "मान्याः संस्कृतशिक्षा सम्प्रति बहूनि प्रत्याह्वानानि सम्मुखीकरोति । तेषु धनस्य विषये प्रसिद्धं प्रत्याह्वानमस्त्येव । तत्र सार्थकानुसन्धनकर्मणि अस्माकं प्रयासः न अतिप्रशंसनीय इत्यंशोऽतीव मुख्यः । शोधविधिविज्ञानमपि विश्वस्तरीयप्रमाणेष्वस्ति न वेति अस्माभिः मापनीयमिति अपरोंऽशः । अस्माभिः कारणद्वयं निमित्तीकृत्य अस्मिन् विषये सावधानैः चिन्तनीयम् । एकं - राष्ट्रस्तरे विश्वविद्यालयस्य अस्य उत्कृष्टतायाः सम्पादनम् ; अपरम् — संस्कृतवाङ्मये उपलभ्यमानानां शास्त्रीयग्रन्थानां प्रेरितदुष्टव्याख्यानानि दृश्यन्ते, तेभ्यः व्याख्यानेभ्यः औत्साहिकान् पाठकान् परावर्त्य तेषां समीचीनायां व्याख्यानसरणौ स्थापनम् इति ।



प्रारम्भिकच्छात्राणामध्ययने साहाय्यहेतोः अस्माकं विश्वविद्यालयः मीमांसा-व्याकरण-साहित्यादिशास्त्रेषु सरलमानक- संस्कृतभाषया पाठ्यग्रन्थान् रचयतीति सर्वे जानन्ति । एतस्मिन् प्रयत्ने एतावता चत्वारः



ग्रन्थाः प्रकाशिता तथा च वास्तु-ज्यौतिषयोः डिप्लोमापाठ्यक्रमः, आलयसंस्कृति-आलयप्रबन्ध-विषये मूक्सविधया (Massive Open Online Courses) पाठ्यक्रमः निर्मितः इति महतः प्रमोदस्य विषयः ।

प्राचीनसंस्कृतवाङ्मये उपलभ्यमानस्य प्रबन्धशास्त्रस्य तान्त्रिकविज्ञानस्य तर्कादिशास्त्रेषु उपलभ्यमानस्य न्यायादिविज्ञानस्य च विषये बहुलं कर्तव्याः भवन्ति । एते प्रयत्नाः एते च विषयाः छात्राणामुद्योगावकाशेषु उपकारकाः सम्भाव्यन्ते ।

छात्राणां प्रशासनसेवापदवीपरीक्षासु भागं ग्रहीतुमपेक्षितानि आनुकूल्यानि सम्पाद्यानि । परन्तु छात्राः एतासु परीक्षासु न उत्साहन्ते । सम्प्रति छात्रैः अध्यापकैश्च एतस्मिन् विषये दृष्टिः प्रसारणीया। अस्माकं छात्राः यथा निर्णयाधिकारवत्सु पदेषु भवेयुः तथा अस्माभिः प्रयतनीयम् । तानि च पदानि राज्ये वा केन्द्रे वा प्रशासनसेवापदानि वा न्यायव्यवस्थासेवापदानि वा भवन्तु । छात्राणाम् एतादृशपदवीप्राप्त्या न केवलं संस्कृतवाङ्मयस्य निरन्तरप्रोत्साहनमेव लभ्यते अपि तु संस्कृतवाङ्मये तालपत्रादिषु निक्षिप्तानाम् अनेकविज्ञाननिधीनां प्रकाशनाय साह्यमपि भवति ।

अस्माकं विश्वविद्यालयः अपि बहुभ्यः ग्रन्थालयेभ्यः विशिष्य पुदुच्चेरीस्थितायाः फ्रेञ्च्-संस्थायाः ग्रन्थालयात् बहूनि संस्कृत-भाषायां स्थितानि वैज्ञानिकतालपत्राणि सम्पादयितुं यतमानोऽस्ति । सर्वेषु विश्वविद्यालयेषु ईदृशाः अधिकाः प्रयत्नाः अत्यन्तम् आवश्यकाः । यदि वयममुं प्रयत्नमतिशीघ्रं न कुर्मः, तर्हि वैदेशिकाः पुरतः आगत्य एतेषां प्रतिकृतिं सम्पाद्य प्राचीनसंस्कृत-वाङ्मयफलानि अनुभोक्ष्यन्ति इति महान् वर्धमानः उपायः सम्भवति ।

गुणेषु यत्नः पुरुषेण कार्यः (An effort should be made by a man for virutes.)

अयमपरः उत्साहवर्धनो विषयो यत् अस्मदीयं विद्यापीठं स्वप्रतिष्ठासंवर्धकाभ्यां कार्यक्रमाभ्यां सामाजिकमुत्तरदायित्वमपि निर्वहति इति । तयोरेकं बालकेन्द्राणां निर्वहणम् । सामाजिकानां कृते अनुष्ठीयमाना योगचिकित्सा च अपरा । त्रिंशैः छात्रैः २०१७ तमे वर्षे बालकेन्द्रं समारब्धम् । अस्मिन् वर्षे तेषां बालकेन्द्राणां सङ्ख्या सप्तत्रिंशत् । तिरुपतौ विविधेषु प्रान्तेषु विद्यमानेषु एतेषु ३७ बालकेन्द्रेषु सहस्राधिकाः बालाः संस्कृतभाषामभ्यस्यन्तः वर्तन्ते । बालेषु मानवीयानां सद्गुणानां प्रवर्धनाय **संस्कारपुस्तिका** इति नाम्ना कश्चित्संक्षिप्तः ग्रन्थोऽपि अनया परियोजनया प्रकाशितोऽस्ति ।

योगचिकित्साकार्यक्रमाः अपि २०१७ तमात् वर्षादेव विद्यापीठस्य योगविभागेन सञ्चाल्यमानाः सन्ति । एतेषु कार्यक्रमेषु औषधसेवनविहीनाः चिकित्सापद्धतयः मधुमेह-रक्तभार-कटिवेदना-ऋतुसम्बन्धिरोगादीनां निवारणाय अनुस्रियन्ते । साधारणप्रजासु अस्मिन् कार्यक्रमे प्रतिस्पन्दना अपि अधिकतरम् उपलभ्यते ।

अस्माकं विद्यापीठस्य कुलपतयः पञ्चमहाकाव्यानां संस्कृत-भाषायां प्रतिश्लोकं सरलव्याख्यानसम्पादनाय मुख्यमुपक्रमं कृतवन्तः सन्ति । एवं रीत्या सरलतया भाषया काव्यानां प्रतिश्लोकं व्याख्यासम्पादनेन छात्राणां सामान्यपाठकानां च पठनसौकर्यम् अवकल्पते । एते काव्यादयः अस्माकं निधयः । एते निधयः संस्कृतपाठशालासु विश्वविद्यालयपाठ्यक्रमेषु वा न अवरोधव्याः अपि तु सर्वेषां लाभाय बहिः प्रकटीकरणीयाः । तेन ये दैवात् स्वबाल्ये इमान् निधीन् सम्प्राप्तुं न अशकन् अथ च इदानीमेतान् ग्रन्थान् पठितुमिच्छन्ति तेषामपि लाभो भविष्यति ।

अहं विश्वविद्यालस्य अस्य प्रत्येकमध्यापकं छात्रं छात्राञ्च संस्कृतवाङ्मयपरिरक्षणे पदातिसैनिकाः भवन्तु इति प्रेरयामि । केवलमस्माकं क्रियाशीलेन सहभागेन सततप्रयत्नेन च अन्याभ्यः भाषाभ्यः प्रत्याह्वानेषु सत्सु अपि भारतीयतायाः चिह्नभूतायाः उत्कृष्टायाः संस्कृतभाषायाः सहजं सौन्दर्यं समाधर्तुं वयं प्रभवामः।

**।। जयतु संस्कृतम् ; जयतु भारतम् ।।**

## कुलपतीनां दीक्षान्तोत्सवे स्वागतभाषणसन्दर्भे विद्यापीठप्रगतिवार्ता




सुहृदः ! विद्यापीठमिदं भारतवर्षस्य अन्यतमविशिष्टसंस्कृत-विश्वविद्यालयरूपेण प्राचीनभारतीयसंस्कृतिज्ञानविज्ञानपरम्परा-संरक्षण-संवर्द्धनविषये अनारतं प्रयतमानं सत् पठन-पाठन-प्रशिक्षण-गवेषणादिकार्यं सुचारुरूपेण सम्पाद्य राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा (NAAC) प्रथमचक्रे A+ स्तरं, द्वितीयचक्रे च चतुरङ्कमापिकायां (4 Point Scale) 3.71 अङ्कान् प्राप्य न केवलं संस्कृतविश्वविद्यालयेषु, प्रत्युत सामान्यविश्व-विद्यालयेषु च समुन्नतस्थानमध्यगच्छदिति वक्तुमानन्दमनुभवामि ।

विद्यापीठीयगुणस्तरसंवर्धनं समीक्ष्य विश्वविद्यालयानुदानायोगेन गतवर्षे (2018 तमे) मार्च्मासे विद्यापीठमिदं प्रथमवर्गीय-मानितविश्वविद्यालयत्वेन (1st Category Deemed University) उद्घुष्टम् ।

गतवर्षीयदीक्षान्तसमारोहात् एतद्दीक्षान्तसमारोहं यावदेकवर्षावधि-काले विद्यापीठेन नैके विनूत्नप्रकल्पाः प्रारब्धाः । इमे खलु प्रयत्नाः संस्कृतविकासार्थमस्मत्कुलाधिपतीनाम् आध्यक्ष्ये समारचितविशेषसमित्या भारतसर्वकाराय समर्पितां दीर्घावधिदृष्टिं, मार्गसूचिकाञ्च (Long Term Vision & Road Map for the development of Sanskrit) अवलम्ब्य समारच्यन्त ।

विद्यापीठेऽस्मिन् शास्त्रशिक्षणे गुणस्तरसंवर्धनार्थं, शास्त्रार्थपाटव-पटिम्नः विकासार्थं च विभिन्नसंस्कृतानुष्ठानेषु शास्त्राण्यधीयानानां विचक्षणानां यूनां प्रशिक्षणकार्यक्रमा एकत्र प्रारब्धाश्चेत्, अन्यत्र पारिषदनाम्ना प्रतिपक्षं विद्यापीठीयाध्यापकानां शास्त्रचर्चाः उपक्रान्ताः । प्राक्शास्त्रि-च्छात्राणां संस्कृतभाषायाः तथा शास्त्राणाञ्च मूलतत्त्वपरिचयार्थं सम्भाषण-शिबिरसञ्चालनविशिष्टशास्त्रकक्ष्या-निर्वहण-शास्त्रपरिचयात्मक-ग्रन्थप्रकाशनादयो नैके विशेषप्रयत्ना विद्यापीठेन समनुष्ठीयन्ते । तथैव अत्र Ford Foundation इति संस्थायाः आर्थिकसाहाय्येन नानाशास्त्रनदीष्णानां शास्त्रीय-व्याख्यानानि यानि अमुद्र्यन्त, Centre of Excellence इत्याख्यपरियोजनायां च ये खलु शास्त्रीयाः दृश्यश्रव्यपाठाः समपादिषत ते समेऽपि प्राविधिकप्रभावपरिवर्धनपुरस्सरं (Enhancing their technical efficacy) अन्तर्जाले संस्थाप्य समाजाय समर्पयिष्यन्ते ।

विद्यापीठेन कार्यालयकार्यप्रणाल्यां, परीक्षाविभागीयकार्य-सरणौ, छात्रोपस्थित्यां, शैक्षिकक्रियाकलापेषु सूचनाप्रसारणप्रविधेः (Information and Communication Technology) इत्यस्य प्रयोगः शनैश्शनैः वर्ध्यते । शिक्षाविभागेन मानवसंसाधनविकासमन्त्रालयद्वारा मदनमोहनमालवीययोजनायाम् अखिलभारत-स्तरे संस्कृतशिक्षणप्रशिक्षणे







कार्यरतानां प्रशिक्षकशिक्षाशास्त्रि-च्छात्राणां ज्ञानकौशलानां पारस्परिकविनिमयरूपं विषयाधारितान्त-र्जालकार्यम् (Subject Based Network) प्रारब्धं प्रचलति ।

शैक्षिकवर्षेऽस्मिन् विद्यापीठेन नैकाः कार्यशालाः, राष्ट्रिय-सङ्गोष्ठ्यश्च समनुष्ठीयन्त । तासु २०१८ तमे वर्षे मार्च्मासे Sanskrit Wikipedia संस्थायाः साहाय्येन विद्यापीठीयानां शोधच्छात्राणां तत्र शैक्षिकयोगदानाय अपेक्षितं मार्गदर्शनं कर्तुं A Two Day Sanskrit Wikipedia Edit-a-thon इति नाम्ना कार्यशाला तथा २०१८ एप्रिल्मासे "राष्ट्रियसंस्कृत-लेखनानु-वादकार्यशाला", अगस्ट्मासे साहित्याकदम्याः सहयोगेन "संस्कृतयुवलेखनसम्मेलनम्", दिसम्बरमासे "जयदेवसाहित्यानुशीलनम्" इति नामाभ्यां राष्ट्रियसङ्गोष्ठ्यौ च समचाल्यताम् ।

ऐषमः विद्यापीठेन प्रारम्भिकच्छात्राणामल्पप्रयासेन शास्त्रावगमनार्थं शास्त्रप्रवेशिनीनाम्ना साहित्यादिशास्त्रेषु पाठ्यग्रन्थाः अत्यन्तमनोवैज्ञानिक-शैल्या प्रणीताः प्रणीयन्ते च । इमे च ग्रन्थाः संस्कृतशिक्षणसंस्थासु पाठ्यपुस्तकरूपेण तत्तत्पाठ्यक्रमेषु अध्येतुमर्हास्सन्ति । इत्थं विद्यापीठेन शास्त्रपरिचयात्मकग्रन्थाः चत्वारः, बीजगणितम्, श्रीचैतन्यचित्रकथा, उत्कलश्रीमञ्जूषा इति संज्ञिताः ग्रन्थाः महस्विनीशोधपत्रिका इत्याहत्य अष्टौ ग्रन्थाः प्रकाश्य समाजाय समर्पिताः ।

किञ्च विभिन्नविभागपक्षतः बहुविधाः शैक्षिककार्यक्रमाः आयोजिताः, तथा अन्यत्र देशे विदेशेषु अपि आयोजितेषु कार्यक्रमेषु भागग्रहण-मस्माकमध्यापकैः कृतम् । तथैव च्छात्रैरपि बहुषु स्थानेषु अनुष्ठितेषु विभिन्नकार्यक्रमेषु भागग्रहणं विधाय विद्यापीठस्य गौरवं संवर्धितम् । एतत्कारणतः विद्यापीठेन समग्रदेशे सुमहत् यशः अर्जितम् । एतदर्थं विद्यापीठपरिवारसदस्याः सर्वेऽपि कारणीभूताः इति तेभ्यः सर्वेभ्यः भूयोभूयः कार्तज्ञसुमानि समर्प्यन्ते, तथा च विद्यापीठस्य पुनरपि उत्तरोत्तरप्रगतये अद्य वयं पुनः प्रतिबद्धाः भवाम इति सविनयं प्रतिश्रूयते ।

**सम्भावनार्हान् सम्भाव्य स्वयं सम्भावनार्हताम् ।**
**सम्प्राप्तं राष्ट्रियं विद्यापीठं धन्यं भवेदिदम् ।**

प्रियस्नातकाः ! भवद्भिः विशिष्टसंस्कृतरत्नैः भाव्यम् । समाजः भवदीयामप्रतिमां प्रतिभामवलोक्य सम्मानयेत् । एतदर्थं भवद्भिः निरन्तरपरिश्रमरूपः तापस्सोढव्यः । सततपरिश्रमकरणेन स्वस्वक्षेत्रे प्रतिष्ठिता भवन्तु भवन्तः । भवतां मार्गः मङ्गलमयो भवतु । भवतां प्रकृष्टया प्रतिभया सुसंस्कृतव्यवहारेण, प्रतिबद्धतया च मातृस्थानीयस्य विद्यापीठस्यास्य यशः दिशि दिशि प्रसारितं स्यात् ।

**दीक्षयाऽकुण्ठया नित्यमुद्यमैरुत्कटेच्छया ।**
**जीवने जयिनस्सन्तु प्राप्नुयुस्सर्वमङ्गलम् ।।**

## विविधोपाधिधारिणां स्वर्णपदकभाजां च अन्तेवासिनां चित्रवीथिका





तसमा



## अभिनन्दनानि

दीक्षान्तसमारोहेऽस्मिन् विविधविषयान् पुरस्कृत्य ये शोधच्छात्राः विद्यावारिधिरिति उपाधिमधिगतवन्तः, ये च विविवधकक्षासु उच्चस्थानं सम्प्राप्य स्वर्णपदकैः विभूषिताः, तेषां सर्वेषां कृते शेमुषीपरिवारपक्षतः हार्दानि अभिनन्दनानि विज्ञाप्यन्ते । ये च परीक्षानियन्त्रकाः, उपपरीक्षानियन्त्रकाः परीक्षाविभागस्य कर्मचारिणः एतेषां परीक्षामूल्याङ्कने श्रमं स्वीकृत्य प्रणालीं त्वरान्वितामकुर्वन् तेभ्योऽपि धन्यवादाः वितीर्यन्ते ।

## दीक्षान्तसमारोहे वाचस्पत्युपाधिभाजौ विद्वांसौ

### डॉ.के.यस्.कण्णन्महाभागाः



**डॉ.के.यस्.कण्णन्महाभागाः** १९५३ अगष्टमासे २४ दिनाङ्के पण्डितानां वंशे लब्धजन्मानः संस्कृतसन्ध्याकलाशालायाः प्राचार्याः संस्कृत-कार्णटिकांग्लभाषासाहितीधुरन्धराः अन्ताराष्ट्रियस्तरे शोधलेखाभिः प्राप्तयशस्काः, क्षेमकुतूहलम्, भैमीपरिणयनाटकसंग्रहः, वनप्रसङ्गः, कृदन्तरूपकोशः, धातुरूपकोशः इत्यादीनाम् अष्टादशग्रन्थानां रचयितारः ; विद्यानिधि-संस्कृतवर्ष-अन्ताराष्ट्रियोत्कृष्ट-अमरभारतीस्वर्णपदकपुरस्कार-भाजः विदुषः अस्मद्विद्यापीठात् "**वाचस्पतिः**" इत्युपाधिना विभूषिता सन्ति । इमे कर्णाटकसंस्कृतमुक्तविश्वविद्यालयात् पि.हेच्.डि इति उपाधिं समवाप्नुवन् ।

### आचार्यश्रीप्रेमसिद्धार्थमहाभागाः



**पूज्याः पारेसहस्रं शिष्यचञ्चरीकसमर्चितपादाब्जाः आचार्य-श्रीप्रेमसिद्धार्थमहाभागाः** १९७७ तमे वर्षे मार्च् मासे १२ तमे दिनाङ्के लब्धजन्मानः, "आर्षविद्यावाहिनी" इति प्राथमिक-हिन्दूदार्शनिकपाठ्य-प्रणालीनिर्मातारः, उपनिषद्गीता-ब्रह्मसूत्राणाम् अद्वैतप्रकरणग्रन्थानां बोधयितारः, "वैदिकसदाचारः", "वेदान्त-परिचयः", "उपनिषत्परिचयः", "ब्रह्मसूत्रपरिचयः" इति पुस्तकचतुष्टयस्य निर्मातारः ; प्रतिवर्षं श्रीशङ्कर-भगवत्पादपवित्र-जीवनोत्सववेलायामेव नैकानां ज्ञानयज्ञानां निर्वाहकाः ; विविध-ध्यानशिक्षणशालानां प्रचोदकाः सन्ति । एतेषां भारतीयसंस्कृतिं प्रति अनुरागं दृष्ट्वा विद्यापीठमेतान् "वाचस्पतिः" इति उपाधिना व्यभूषयत् ।

विक्रमार्जितराज्यस्य स्वयमेव मृगेन्द्रता (The lion, acquiring a kingdom by his prowess, is the Lord of the beasts in his own rights.)



## दीक्षान्तसमारोहे महामहोपाध्यायोपाधिभाजः विद्वांसः

### श्रीतिगुळ्ळ श्रीहरिशर्ममहाभागाः



**श्रीतिगुळ्ळ श्रीहरिशर्ममहाभागाः** श्रीमतोः श्रीवेङ्कटय्य-श्रीमतीअलमेलुपुण्यदम्पत्योः सुपुत्राः १९५१ तमे वर्षे जुन् मासस्य चतुर्थे दिनाङ्के लब्धजन्मानः वेदशास्त्र-साहित्य-पुराणेतिहासादिषु संस्कृतान्ध्र-भाषासाहित्ययोः कृतभूरिपरिश्रमाः वेलवाडराजराजेश्वर-कलाशालायाः प्रांशुपालचराः महाकविवानमामलैस्मारकपुरस्कार-अवधानिवेङ्कटराज-स्मारकपुरस्कार-पोट्टिश्रीरामुलुतेलुगुविश्व-विद्यालयधर्मनिधिपुरस्कार-तेलङ्गणाराष्ट्रावतरणसम्बद्धपुरस्कारभाजः भवन्ति । तथैव एते **अवधानकलाभूषणः, अवधानप्रवीणः, अवधानचतुराननः, उभयभाषावधानी, विद्या-वाचस्पतिः, अवधानकेशरी** इति बिरुदैरपि अलङ्कृताः सन्ति । श्रीमतां व्याकरणवेदान्तशास्त्रनदीष्णानां संस्कृतान्ध्रभाषावधानिशिरोरत्नायमानानां महामहोपाध्यायोपाधिदानेन विद्यापीठमस्माकं गौरवं निर्वहति ।



### केशवराव्सदाशिवशास्त्रिमुसल् गावंकर् महाभागाः

दिवङ्गतपण्डितसदाशिवशास्त्रिमुसल्गावंकर्-महाभागानां तनयाः, १९२८ मार्च् मासे २९ दिनाङ्के मध्यप्रदेशराज्ये ग्वालियर्नगरे लब्धजन्मानः संस्कृतवाङ्मयविज्ञानान्वेषकप्रवराः, मीमांसा-साहित्य-धर्मशास्त्र-व्याकरणादिशास्त्रेषु निष्णाताः पद्मश्रीसम्मानोपाधिभाजः **केशवराव्सदाशिवशास्त्रिमुसल् गावंकर् महाभागाः** ग्वालियर्नगरे सर्वकारसंस्कृतकलाशालायां संस्कृतोपन्यासकरूपेण, शिवानीनगरे मध्यप्रदेशराज्ये सर्वकारोन्नत-पाठशालायां प्रांशुपालरूपेण च कार्यं विधाय "संस्कृतमहाकाव्य की परम्परा", "आधुनिकसंस्कृतकाव्यपरम्परा", "संस्कृतनाट्य-मीमांसा" इत्यादीन् बहून् दुर्लभग्रन्थान् विलिख्य संस्कृतजनन्याः महतीं सेवामकार्षुः । एते पद्मश्रीसम्मानन-युवभारतीपुरस्कार-कालिदासपुरस्कार-राष्ट्रपतिसम्मानन-कलासंवाहकसम्मानन-राजशेखरसम्मानन-महाराष्ट्रभूषणसम्मानन-भरतमुनिसम्मानन-उज्जयिनीशिक्षासम्माननानि सम्प्राप्य सम्मानोपाधीनोपाधीनपि समुज्जीवयन्ती । उज्जयिन्याम् आयोजिते एकस्मिन् विशिष्टकार्यक्रमे एतादृशाय पण्डितप्रवराय महामहोपाध्यायोपाधिप्रदानेन सर्वेऽपि विद्यापीठान्तेवासिनः हर्षोल्लासाः गौरवान्विताश्चाभूवन् ।

### श्री उभयवेदान्त मन्नारगुडि राजगोपालाचार्यस्वामिनः



**श्री उभयवेदान्त मन्नारगुडि राजगोपालाचार्यस्वामिमहाभागाः** श्री आर्.सुन्दरम्महोदयानाम् औरसाः पुत्राः ; न्याय-विशिष्टाद्वैतवेदान्त-मीमांसा-व्याकरण-काव्यादिषु शास्त्रेषु च विश्रुतकीर्त्तयः ; अहोबिलमठस्य आस्थानपण्डिताः ; नृसिंहप्रियायाः आङ्ग्लपत्रिकायाः सम्पादकमण्डल्यक्ष्यक्षाः ; "सन्ध्यावन्दनभाष्यम्", "वेदान्तदेशिकवैभवप्रकाशिका", "शताभिषेकम्" इति प्रसिद्धानां ग्रन्थानां रचयितारः ; "उभयमीमांसावल्लभः", "पूर्वोत्तरतन्त्र-वाचस्पतिः", "देशिकदर्शनचूडामणिबिरुदम्", "वेदान्तविशारदबिरुदम्", "उभयवेदान्तकल्पद्रुमबिरुदम्" इति पुरस्कारभाजः पण्डिताः विद्यापीठपक्षतः "महामहोपाध्यायः" इति उपाधिना व्यभूष्यन्त ।

परोपकारः पुण्याय (Doing good to others results in merit.)

# दीक्षान्तसमारोहे स्वर्णपदकभाजः छात्राः

द्वाविंशे दीक्षान्तसमारोहेऽस्मिन् एकविंशतिसंख्याकाः छात्राः विविधस्वर्णपदकैः पुरस्कृता अभूवन् । यथा —

**एस्.पि.तेजस्वी (अद्वैतवेदान्ताचार्ये)**

* श्रीवनामामलाई रामानुज जीयर् स्वामी स्वर्णपदकम्
* श्रीमती एस्.बी.विजयलक्ष्मी तथा आचार्य-एस्.बि. रघुनाथाचार्य स्वर्णपदकम्
* डॉ.शङ्करदयालशर्मास्वर्णपदकम्
* महामहोपाध्यायमद्दुल्लपल्ली माणिक्यशास्त्रिस्वर्णपदकम्
* श्रीमतीशेषरत्नम् तथा आचार्य के.दक्षिणामूर्त्तीस्वर्णपदकम्
* नीलम् राजु वेङ्कटनरसिंहराव तथा नीलम् राजु भानुमतीशुद्ध-स्वर्णपदकम्
* ब्रह्मश्रीगोदा सुब्रह्मण्यशास्त्रिस्मृतिधनराशिः (पञ्चसहस्त्ररूपक्याणि)
* विद्यापीठस्वर्णपदकम्, कुलाधिपतिस्वर्णपदकञ्च

**निरञ्जनपुरोहितः (आचार्यवेदभाष्यम्)**

* अकेल्ला विश्वेश्वराव तथा बलत्रिपुरसुन्दरीशुद्धस्वर्णपदकम्
* विद्यापीठस्वर्णपदकम्

**जे.नागप्रसून (शास्त्रिस्तरे)**

* श्रीश्रीधराचार्यस्वर्णपदकपुरस्कारः
* डॉ.एम्.अनन्तशयनम् आयङ्गर धनराशिपुरस्कारः (पञ्चसहस्त्ररूप्यकाणाम्)
* विद्यापीठस्वर्णपदकम्

**देशपाण्डे श्रीवाणी (प्राक्शास्त्रिस्तरे)**

* श्रीआचार्य विनोवाभावेसर्वमङ्गलस्वर्णपदकम्
* डॉ.एम्.अनन्तशयनम् आयङ्गर धनराशिपुरस्कारः (पञ्चसहस्त्ररूप्यकाणाम्)

**गोष्ठी श्रीनागलक्ष्मी (शिक्षाशास्त्रिस्तरे)**

* डॉ.आर्.एन्.आर्लीकट्टीधनराशिपुरस्कारः (पञ्चशतरूप्यकाणाम्)
* नवजीवनस्वर्णपदकम्
* विद्यापीठस्वर्णपदकम्

**मुष्टि स्वातीकल्याणी (साहित्याचार्ये)**

* श्रीमती एस्.बी.वेङ्कटलक्ष्मी तथा श्री एस्.बी.एल्.नरसिंहाचार्य स्वर्णपदकम्
* श्रीमती कमलाम्मा तथा श्रीअच्युतदेवराजभट्टारस्वर्णपदकम्
* आचार्य यू.शङ्करभट्टस्वर्णपदकम्
* विद्यापीठस्वर्णपदकम्

**अम्बरुखानश्रीनिवासशर्मा (फलितज्योतिषाचार्ये)**

* वराहमिहिरप्रशस्तिस्वर्णपदकम्
* विद्यापीठस्वर्णपदकम्

**सत्यव्रतसाहुः (विशिष्टाद्वैतवेदान्ताचार्ये)**

* भगवानश्रीस्वामिनारायणस्वर्णपदकम्
* विद्यापीठस्वर्णपदकम्

**के.एस्.आर्.चक्रवर्ती (न्यायाचार्ये)**

* श्री एस्.बी.टी.रामानुजाचार्युलुस्वर्णपदकम्
* महामहोपाध्यायमद्दुलपल्लीमाणिक्यशास्त्रिस्मृतिस्वर्णपदकम्
* विद्यापीठस्वर्णपदकम्

**श्रुति के.बि. (शिक्षाचार्यस्तरे)**

* आचार्यरामानुजदेवनाथन्स्मृतिस्वर्णपदकम्
* आचार्य चन्द्रशेखरपाण्डे स्मृतिधनराशिपुरस्कारः (एकादशसहस्त्ररूप्यकाणाम्)
* विद्यापीठस्वर्णपदकम्

**आर्.प्रियम्बदा (शास्त्रीद्वितीयवर्षे)**

* स्वर्गत डॉ.माल्लाडि डि.बालसुब्रह्मण्यम् उत्तमच्छात्र-स्वर्णपदकपुरस्कारः

**कोङ्ककुमारस्वामी (पि.जि.डिप्लोमा-योगविज्ञाने)**

* उत्तमयोगसाधकस्वर्णपदकम्

**आदित्यनारायणमहापात्रः (शास्त्रि-वेदभाष्यम्)**

* वेम्पराल सत्यनारायणमूर्त्ति तथा शुभलक्ष्मीशुद्धस्वर्णपदकम्

**जादवनिवृत्तिखण्डुः (शास्त्रि-व्याकरणम्)**

* आचार्य टि.एस्.गङ्गाधरन् स्मृतिधनराशिः (पञ्चसहस्त्ररूप्यकाणाम्)

**पि.यस्.अङ्गदः (आचार्य प्रथमवर्षे सिद्धान्तज्योतिषे)**

* श्रीमती महालक्ष्मी उत्तमच्छात्रस्वर्णपदकम्

* **नीलेशगुप्ता (व्याकरणाचार्ये)** – विद्यापीठस्वर्णपदकम्
* **अमरेशरथः** (धर्मशास्त्राचार्ये) – विद्यापीठस्वर्णपदकम्
* **दीपककुमारदासः** (पुराणेतिहासाचार्ये) - विद्यापीठस्वर्णपदकम्
* **मधुस्मितासाहुः** (पुराणेतिहासाचार्ये) – विद्यापीठस्वर्णपदकम्
* **अजितकुमारशतपथी** (सांख्ययोगाचार्ये) - विद्यापीठस्वर्णपदकम्
* **प्रभातसरकारः** (एम्.ए. - शाब्दबोधे) - विद्यापीठस्वर्णपदकम्





# त्रयोदशः अखिलभारतीयसंस्कृतयुवप्रातिभसमारोहः

**दिनाङ्कः — 04.02.2019 le: 07.02.2019**



भारतस्य विविधराज्येषु संस्कृतमधीयानानां व्युत्पन्नमतीनां छात्राणाम् अन्तर्निहितसार्वभौमिकमेधायाः विकासार्थं ऐषमः विद्यापीठप्राङ्गणे **त्रयोदशः अखिलभारतीयसंस्कृतच्छात्र-प्रातिभसमारोहः** "वाक्पतङ्गाय धीयते", "युवा स्यात्साधु युवाध्यायकः" इति मन्त्रबद्धपरिकरः बहुविधसांस्कृतिक-शैक्षिक-कार्यक्रमैः महता वैभवेन 04.02.2019 दिनाङ्कात् प्रारभ्य 07.02.2019 दिनाङ्कं यावद् वाग्वर्धिनीपरिषदः प्रत्यक्ष-तत्त्वावधानेन महता वैभवेन विद्यापीठस्य परिसरे पर्यपाल्यत।

समारोहेऽस्मिन् भारतदेशस्य विविधराज्यानां चतुस्त्रिंशत्-शिक्षानुष्ठानेभ्यः 373 संख्याकाः छात्राः विविधासु स्पर्धासु भागं गृहीत्वा स्वीयप्रतिभां प्रादर्शयन् ।

कार्यक्रमस्य समारम्भः मान्यानां विद्यापीठस्य सङ्घायप्रमुखानाम् आचार्य राणी सदाशिव मूर्त्तिमहोदयानां स्वागतभाषणेन समभूत् ।

अस्मिन् शुभमुहूर्त्ते समारोहस्य समुद्घाटनमहोत्सवे नवदेहलीस्थ-साहित्याकदम्याः मान्याः सचिवाः डॉ.के.श्रीनिवासराव महोदयाः मुख्यातिथिरूपेण समागत्य भारतस्य संस्कृतेः, संस्कृतभाषायाश्च महत्त्वमुदघोषयन् । सम्पूर्णविश्वसाहित्यस्य विकासाय संस्कृतभाषा-साहित्यं मुख्यां भूमिकां निर्वहति ; भारते संस्कृतिनिर्झरिणी प्रवहति ; प्राचीनमुनीनां प्रज्ञया उद्भूततथ्यानि नवनिर्माणाय मार्गं निर्दिशति इत्येवं प्रकारेण बहुधा छात्रान् उद्बोध्य डॉ.रावमहोदयाः नवयुवकानां प्रोत्साहनेन सह सहस्त्रवर्षेभ्यः प्राक् रचितस्य प्राचीनज्ञानविज्ञानराशेः वेदपुराणादेः मूल्याङ्कनार्थं प्राबोधयन् । श्रीयुक्तरावमहोदयाः भारतदेशे प्रचलितानां विविध-भाषाणां साहित्यसमृद्धौ निहितमतयः बृहत्साहित्यज्ञानचक्रं निर्मातुं सततं यतमानाः नानाप्रकल्पैः, सङ्गोष्ठीभिः, सम्मेलनैश्च युवकवीनां, प्रौढकवीनाम्, लेखकानाम् प्रोत्साहनार्थं लुप्तप्रायसंस्कृतीनां पुनरुद्धरणार्थं च बहूनि कार्याणि कुर्वन्ति । एतेषां शुभकामनया विद्यापीठेऽपि कवीनां बहवः समवायाः समायोज्यन्त । तेषां समागमसन्दर्भे स्वागतिकेयं गीतिका —

साहित्यामृतपानसारसरसाः नानाविधैः कल्पनै-
र्यूनां नूतननिर्मितौ स्तुतिकराः श्रीभारतीसेवकाः ।
मान्याः रावकुलस्य भूषणवराः श्रीश्रीनिवासाः समे
सम्प्राप्यात्र भवदीयदिव्यचरणौ धन्याः वयं साम्प्रतम् ।।

अपि च समारोहं पुरस्कृत्य तिरुपतिवास्तव्यानां सामाजिकानां कृते संस्कृतसंस्कृतिविज्ञानवैभवप्रदर्शनार्थं मान्यकुलपतीनां प्रेरणया प्रकल्पितस्य "**संस्कृतविज्ञानप्रदर्शिनीकेन्द्रस्य**" समुद्घाटकत्वेन आसन् प्रियतमाः संस्कृतान्ध्रराज्यस्य आरक्षिमुख्यनिदेशकचराः **श्रीअरविन्दरावमहोदयाः** । संस्कृतस्य कृते एतेषां योगदानं सर्वदा अविस्मरणीयमेव । श्रीमद्भगवद्गीता, उपनिषद्, अद्वैतवेदान्तः इत्यादिषु साहित्येषु तेषामनुपमा रतिः वर्तते । उपनिषदां विषये एतेषां बहूनि प्रवचनानि यु-ट्यूब्मध्ये प्राप्यन्ते । महोत्सववेदिका-समलङ्कृताः महाशया इमे संस्कृतशास्त्राणां विस्तृतपरिसरं संसूच्य भगवद्गीतोपनिषदादिषु समृपबृंहितानां मानवीयमूल्यबोधानाम्, भूमण्डलीकरणप्रक्रियाणां च विषये उदाहरणानि प्रास्तुवन् । ज्ञानं सर्वदा शुद्धमेवास्तीति प्रबोध्य समारोहस्पर्धासु भागजिघृक्षूणां छात्राणां सर्वविधोन्नतिकामनामकार्षुः। सन्दर्भेऽस्मिन् तेषां कृते अयमेव धन्यवादपुष्पाञ्जलिः प्रदत्तः —





हे मान्याः ! अरविन्दरावचरणाः वेदान्तविद्योपमाः
श्रीश्रीशङ्करमार्गमार्गणपराः धन्यं भवज्जीवनम् ।
धन्या सा प्रतिभा त्वदीयममता धन्या च या संस्कृते
धन्या सङ्गतिमाप्य भवतां नित्योत्सवा वेदिका ।।

अस्य सारस्वतमहोत्सवस्य मार्गदर्शकाः विद्यापीठस्य उन्नत्यभीप्सवः प्रियतमाः मान्याः कुलपतयः आचार्याः वि.मुरलीधर-शर्ममहोदयाः अध्यक्षाः आसन् । संस्कृतसम्भाषण-कौशलविकासार्थं, शास्त्राणां पारम्परिकमर्यादाभिरक्षणार्थं सततं यतमाना इमे कार्यक्रमस्य सफलतायै सर्वविधं सौकर्यं प्राकल्पयन् । इमे प्रतिस्पर्धिच्छात्राणामावासभोजनादिविषये, सर्वेषां प्रोत्साहनार्थं, सामाजिकानां च संस्कृतं प्रति जागरणमानेतुं नानाविधानुचिन्तनानि सभाध्यक्षत्वेन प्रघटीकृत्य, स्पर्धिष्णुच्छात्राणां मनोबलं द्रढ्यकुर्वन् । सन्दर्भेऽस्मिन् उच्यते -

सत्याचारविचारशिक्षणपराः ! भाषाधिकारोपलाः
छात्राणां हितचिन्तकाः कुलपतेस्सिंहासने भूषिताः ।
विज्ञानोन्नतिसाधकास्सुरगिरस्सारल्यसम्पादकाः !
हे मान्याः ! विनिवेद्यते भवतः हार्दः कृतज्ञाञ्जलिः ।।

वाग्वर्धिनीपरिषदः वरिष्ठसंयोजकाः डॉ.यस्.मुरलीधर-रावमहोदयाः परिषदस्तथा च प्रातिभसमारोहस्य उद्देश्यानि



समुपास्थापयन् । सभान्ते च परिषदः अपरः संयोजकः डॉ.सोमनाथदाशमहोदयः धन्यवादं समार्पयत् ।

दिनचतुष्टयं यावत् प्रचाल्यमानासु स्पर्धासु प्राप्त-पुरस्काराणां विजेतॄणां नामानि अत्रोपस्थाप्यन्ते —

### (१) स्पर्धानाम — अन्त्याक्षरी

प्रथमः कुमारश्री हेगडे, श्रीमाता सं.वै.शिक्षण संस्था, कर्णाटकम्
द्वितीयः प्रभा शर्मा, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः
तृतीयः अनील टि.जोशी, एस्.एम्.एस्.पि.संस्कृताध्ययनकेन्द्रम्, उडुपि
अनील कुमार देशाई, एस्.एम्.एस्.पि.संस्कृताध्ययनकेन्द्रम्, उडुपि
सान्त्वना जोशी शिवकुमार योगेश भाई, ब्रह्मर्षि सं.महाविद्यालयः, गुजुराट

### (२) स्पर्धानाम — संस्कृतगीतगानस्पर्धा

प्रथमः मुक्ता जोशी, सावित्रीवाई फुले पुने विश्वविद्यालयः, पुने
द्वितीयः टि.वागधीश्वरी, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः
तृतीयः अपर्णा होल्ला के.ए., राजीवगान्धिपरिसरः, शृङ्गेरी



श्रीनाथन् के.पि., गुरुवायूर् परिसरः, केरला
सान्त्वना देवाङ्ग भट्टः, जयपुरपरिसरः, जयपुरम्, राजस्थानम्
आर्य टि.बि., श्रीशङ्कराचार्यविश्वविद्यालयः, कालाडि, केरला

### (३) स्पर्धानाम — जानपदनृत्यस्पर्धा

प्रथमः राष्ट्रियसंस्कृतसंस्थानम्, राजीवगान्धिपरिसरः, शृङ्गेरी
द्वितीयः राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, आ.प्र.
तृतीयः सर्वकारीयसंस्कृतमहाविद्यालयः, त्रिपुणीत्तूर्, केरला
सावित्रीवाई फुले पुने विश्वविद्यालयः, पुने
सान्त्वना राष्ट्रियसंस्कृतसंस्थानम्, वेदव्यासपरिसरः, हिमाचलप्रदेशः

### (४) स्पर्धानाम — साहित्यभाषणस्पर्धाः

प्रथमः देवाङ्गभट्टः, राष्ट्रियसंस्कृतसंस्थानम्, जयपुरपरिसरः,राजस्थानम्
द्वितीयः शरण्य पि., राजीवगान्धिपरिसरः, शृङ्गेरी, कर्णाटकम्
तृतीयः यदुश्री के.पी., राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः
सान्त्वना सुदर्शनः, पूर्णप्रज्ञविद्यापीठसंस्कृत यु.जि. पि.जि.केन्द्रम्, बाङ्गलोर्







### (५) स्पर्धानाम — ज्योतिषभाषणस्पर्धा

प्रथमः वादिराजतन्त्री, एस्.एम्.एस्.पि.संस्कृतमहाविद्यालयः, उडुपि
द्वितीयः शशाङ्क जि.हेगडे, श्रीश्रीमाता सं.वै.शिक्षण संस्था, कर्णाटकम्
तृतीयः विवेकत्रिपाठी, राजीवगान्धिपरिसरः, शृङ्गेरी, कर्णाटकम्
सान्त्वना अभिषेकशाण्डिल्यः, म.अ.हिन्दीविश्वविद्यालयः, वार्धा

### (६) स्पर्धानाम — न्यायभाषणस्पर्धा

प्रथमः शुभदीपदासः, विवेकानन्दशैक्षिकानुसन्धानकेन्द्रम्, पश्चिमबङ्गः
द्वितीयः एस्.अभीक्षा, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, आ.प्र.
तृतीयः किशोर यु.कुल्कर्णी, पू.प्र.वि.संस्कृत यु.जि.पि.जि.केन्द्रम्, बाङ्गलोर्

### (७) स्पर्धानाम — व्याकरणस्पर्धा

प्रथमः श्रीतेजानन्दनम्, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, आ.प्र.
द्वितीयः श्रीनिवासः, श्रीला.ब.शास्त्रिराष्ट्रियसंस्कृतविद्यापीठम्, नवदिल्ली
तृतीयः नन्दुरवीन्द्रन्, श्रीशङ्कराचार्यसंस्कृतविश्वविद्यालयः, कालाडि
सान्त्वना अश्विन जि.भट्टः, राजीवगान्धिपरिसरः, शृङ्गेरी, कर्णाटकम्

### (८) स्पर्धानाम — वेदभाषणस्पर्धा

प्रथमः सञ्जयकुमाररथः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, आ.प्र.
द्वितीयः श्रीगणेशविश्वेश्वरभट्टः, राजीवगान्धिपरिसरः, शृङ्गेरी, कर्णाटकम्
तृतीयः अक्षयकुमारभट्टः, श्रीश्रीमाता सं.वै.शिक्षण संस्था, कर्णाटकम्
A friend of my work colleague (a British migrated to Australia) came to me one day and seriously asked "How do you eat your meal?" A very embarrassing question. I have to tell the truth and explained him how our family is used to sit on the floor together and have the meal

He was not impressed terming it as a stone-age habit and will certainly impact health of the persons and very inquisitively asked "Don't you have a dining table at home? Didn't you or your family members get back problems?"

"Yes, we have a dining table at home and we use it to treat the honourable guests like you.We have no such back issues fortunately." I replied and concluded the conversation.

I saw him after a couple of years in a conference and he greeted me. After a small chat, he asked "Are you guys still sitting on the floor and eating?"

I said "No change in our "bad" habits, they are still with us."

He said "Do you know I also got that bad habit?"

I was surprised why he gave up a comfortable dining table style eating and resorted to this "stone-age" habit. I asked curiously. He narrated his story.

He plays Rugby (similar to our Football) regularly. One day, he fell down during the play and a few other players fell on him chasing the ball. His back was hurt and he was brought home by his colleagues asking him to take some rest.

He could not recover even after a week as the pain was persistent and he decided to see the sports medical specialist. That doctor referred to a few other specialists, a surgeon, back specialist, physio therapist etc and every one had their field game on him for six months (these are his words) with no improvement. He gave up and came to terms that he could not play footy gameany more with his children. That was his simple desire.

He wanted to make a last attempt and approached a renownedbackbone specialist for advice. After a couple of x-rays and a long chat with our friend, that specialist advised him to sit on a hard floor with his back to the wall for five minutes each day and report back after a fortnight.

This guy followed the advice and reported to the specialist. The doctor has taken more x-rays of his back and asked him to continue for another month.

Needless to say, he is now happily playing football with his children and also leading the local Rugby team. Since then, he decided to club the eating and sitting activities and here you go.... he went to the "stone-age" habit !!

He commented laughing, but seriously, he asked "How did you guys know that this posture prevents back pain and is comfortable too?"

I wish I knew the answer.

Further study on our traditional physio postures may shed more light on the health benefits that are built in our life style.

## “DIGITAL HUMANITIES” इति सन्दर्भे व्याख्यानम्



विद्यापीठस्य प्रतिकार्यमङ्कीयतन्त्रस्योपयोगः (Digital Technology) मान्यानां कुलपतीनां मानससङ्कल्पः वर्तते । एतदर्थं कश्चन महान् प्रयत्नः विधीयते । क्षेत्रेऽस्मिन् दक्षाः विद्वांसः हैडल्वर्गविश्वविद्यालयस्य प्रसिद्धाः वैज्ञानिकाः **डॉ.श्रीगणेशमहोदयाः** समागत्य 31.12.2018 दिनाङ्के सोमवासरे Power Point प्रदर्शनेन “मातृदेवो भव” इति विषयमाधारीकृत्य व्याख्यानमेकं समुपास्थापयन् । जर्मनीराष्ट्रे विद्यामानाः सर्वेऽपि द्वादशसंख्याकाः विश्वविद्यालयाः संस्कृतभाषायाः विषये बहूनि अनुसन्धानमूलकानि कार्याणि कुर्वन्ति । विशिष्टतया हैडल्वर्गविश्वविद्यालयः भाषामधिकृत्य अनुसन्धाने प्रवृत्तोऽस्ति । श्रीगणेशमहोदयाः सन्दर्भेऽस्मिन् संस्कृतज्ञानविज्ञानस्य विस्फोरकस्थानानाम् अन्तर्जाल-जालस्थानानां महत्त्वमुद्घोष्य तत्र विद्यमानानां e-Library तथा Virtual Museum इत्यादीनां संस्कृतभाषाशास्त्रज्ञानार्थं महत्सहभागितामाविरकुर्वन् । मान्याः कुलपतयः **आचार्य विरिवेण्टिमुरलीधरशर्ममहाभागाः** आधुनिकसमयानुरोधेन विद्यापीठमिदं प्रत्येकं शैक्षिकानुसन्धानक्षेत्रे सङ्गणकीयोपकरणानां सहयोगेन **अङ्कीयवेदिकां (Digital Platform)** निर्मातुं सदैव तत्परमस्ति, तथा च लक्ष्यात्किञ्चिद् दूरे वर्तते इति सहर्षमुद्घोष्य विद्यापीठस्य आगामिशैक्षिकवर्षं **अङ्कीयवर्षं (Digital Year)** स्याद् इति स्वाभिप्रायं प्रकट्यकार्षुः ।

## अन्ताराष्ट्रियदिव्याङ्गदिवसः – सुगम्यभारताभियानम्

वैश्विकस्तरे दिव्याङ्गानां (Persons with disabilities) अधिकार-कल्याण-स्वस्थतानां परिबृंहणार्थं United Nations General Assembly इत्यस्य 47/3 धारायां वर्षे एकवारं विश्वदिवाङ्गदिवसस्य (Interanational Day for Disabled Person) परिपालनाय नीतिः निर्धारिताऽस्ति । सन्दर्भेऽस्मिन् प्रतिवर्षमिव ऐषमोऽपि राष्ट्रियसंस्कृतविद्यापीठस्य प्राङ्गणे 03.12.2018 दिनाङ्के दिवसमहोत्सवममुं पुरस्कृत्य **“सुगम्य- भारताभियानम्”** (Accessible India Campaign) इति कार्यक्रमः पर्यपाल्यत । कार्यक्रमेऽस्मिन् समागताः मुख्यातिथयः शैक्षिकसङ्कायप्रमुखाः आचार्य आर्.एल्.नरसिंहशास्त्रिमहाभागाः भारतस्य प्रसिद्धानां चतुर्दश दिव्याङ्गानां सुधाचन्द्रन्-गिरीशशर्म-शेखरनायक-प्रीतिश्रीनिवासन्-सतेन्द्रसिंह-रामकृष्णन्-साईप्रसादविश्वनाथन्-आकवरखानप्रमुखानामुदाहरणानि प्रदर्श्य प्राचोदयन् यत् दिव्याङ्गत्वबोधः केवलं मानसविचार एव, अत्र केवलमेकस्यैव शारीरिकाङ्गस्याक्षमत्वं सिद्ध्यति, न मानसिकभावनायाः न्यूनता स्यात् ; अनेन आत्मबलहीनताबोधः न स्यात्, दृढभावनया कार्यं कृत्वा सर्वेऽपि विश्वविजयिनो भवितुमर्हन्ति इति । सन्दर्भेऽस्मिन् विद्यापीठे कार्यरतानां रमेश-ईश्वरकुमार-प्रमुखानां दिव्याङ्गानां यथोचितसम्माननम् अक्रियत । आचार्य चक्रवर्तिराघवन्महोदयाः कार्यक्रमस्यास्य संयोजकाः आसन् । अन्ये च विद्यापीठस्य सर्वेऽप्यध्यापकाः आचार्याः, छात्राः उपस्थिता आसन् । डॉ.आर्.चन्द्रशेखरमहोदयाः आतिथ्यं निरवहन् ।









## वीरभटानां महाप्रयाणे शोभायात्रा अमरज्योतिःप्रज्वालनञ्च



**पुष्पं न कांक्षति कदाप्यवलासुकण्ठं,**
**नैवापि हारवलयं सुरभूषणत्वम् ।**
**येनाध्वना भुवनवीरगणारसून् स्वान्**
**त्यक्त्वा गतास्तदुपकांक्षति पुण्यमार्गम् ।।**

महतः दुःखस्य विषयोऽयं यत् विगते १४.०२.२०१९ दिनाङ्के जम्मु-श्रीनगरजातीयराजपथे पुल्वामाजिल्लायाः लेथपोरानामके स्थाने सैन्यवाहिनीयानस्योपरि आतङ्कविस्फोटनेन चत्वारिंशत् CRPF सैनिकाः वीरगतिम् अवाप्नुवन् । अनेन विश्वस्मिन् विश्वे सर्वत्र मर्मन्तुदशोकप्रवाहः अवलोकितः । तेषां वीरभटानां कृते अश्रुलश्रद्धाञ्जलिप्रदानपूर्वकं विद्यापीठीयाः सर्वेऽपि कुलपति-कुलसचिव-शैक्षिकसङ्कायप्रमुखसमेताः अध्यापकाः कर्मचारिणः, अन्तेवासिनः, अन्तेवासिन्यश्च प्रदीपज्योतिःप्रज्वालनं कृत्वा शोभायात्रामकुर्वन् ; शोकाकुलपरिवेशे वीरभटानां महाप्रयाणयात्रामार्गे पुष्पाञ्जलि-समर्पणपूर्वकं विद्यापीठपक्षतः तेषां परिवारसदस्यानां कृते सदिच्छां व्यतानिषुः ।





## Talent of our Students in Glory Fest-2019 held at Puri, Odisha



**दर्शना रए**
**हिन्दुस्तानीशास्त्रीयसङ्गीते तृतीया**



**एस्.महती**
**LIGHT VOCAL, 1ST**



**टि.वागधीश्वरी**
**बाहुलीना(Violin)वादने तृतीया**

## हिमाचलप्रदेशमुख्यमन्त्रिणां विद्यापीठपदार्पणम्




हिमाचलप्रदेशस्य मान्याः मुख्यमन्त्रिणः **श्रीजयरामठाकुर-महोदयाः** विद्यापीठस्य परमपावनभूमिमलङ्कृत्य, तेषां स्वागताय समायोजिते समारोहे राजनीतौ नेतृचयनाय ये प्रप्रथमतया मतदातारो भवन्ति युवानः छात्राः, तान् स्वाभिभाषणेन अभ्यप्रेरयन् । "यद्दलं भारतस्य सुरक्षां विधातुं सततं यतमानं भवति, भारतीयनागरिकाणां सर्वविधौन्न्यत्यये कार्यं विदधाति, सैनिकैः सह सर्वदा तिष्ठति ; तस्य कृते मतदानमस्माकं परमं कर्तव्यं स्यात्" इति तेषामभिप्रायः आसीत् ।

मन्त्रिवर्यैस्सह पारस्परिकभावविनिमयावसरे विद्यापीठस्य विविधप्रान्तेभ्यः समागताः छात्राः सन्ध्याराणी (उत्तरप्रदेशः), एस्.वैष्णवी (तामिलनाडु), पार्थसारथिपत्री, दुर्गाचरणपण्डा (ओडिशा), आशीषकुमारपाण्डे (बिहारः) इति प्रमुखाः राजनीति-युवविकास-संस्कृतसुरक्षादिविषये अनेकाः समस्याः समुपास्थापयन् । मान्याः अभ्यागताः मन्त्रिणः तासां समस्यानां समाधानोपायान् आविरकार्षुः । यथा — "गणतन्त्रप्रधाने राष्ट्रे सर्वविधविकासः यूनां वैयक्तिकात्मबोधनेनैव सम्भवति । नैतिकतायाः स्खलनं विनैव जनतन्त्रस्य सफलता स्यात् । हिमाचलप्रदेशे उत्तराखण्डात् अनन्तरं संस्कृतभाषा राज्यस्य द्वितीयभाषात्वेन उदघोष्यत । एतत् संस्कृतभाषायाः प्रगतेः सोपानारोहणमेवास्ति ।"

श्रीठाकुरमहोदयाः मदिरामदान्धताविषयेऽपि प्रकाशं न्यक्षिपन् । आधुनिकयुवसमाजः सुरापानसमस्यया बहुधा सङ्घर्षं करोति । नैतिकतायाः विकासेन सह अस्य निराकरणं सर्वेषां परमं चरमञ्च लक्ष्यं भवेत् इति ते उदबोधयन् ।

कार्यक्रमस्यान्ते श्रीयुक्तमन्त्रिणः शिशूनां कृते Polio बिन्दून् अपाययन् । सन्दर्भेऽस्मिन् विद्यापीठस्य कुलसचिवाः, सङ्घाय-प्रमुखाः, शिक्षासङ्घायप्रमुखाः मन्त्रिणां स्वागतं विधाय विद्यापीठस्य पुस्तकालयसमेताः विविधप्रदर्शिनीशालाः प्रादर्शयन् । विद्यापीठ-पक्षतः मन्त्रिवर्याणां करकमलयोः भारतीयसंस्कृतेः पवित्रग्रन्थः "श्रीमद्भगवद्गीता" प्रत्यर्प्यत । महानुभवानुभावानां मन्त्रिणां समागमेन विद्यापीठमिदं धन्यमभूत् ।

## ई-पुस्तकालयसमुद्घाटनम्



राष्ट्रियसंस्कृतविद्यापीठे ऐदं प्राथम्येन मान्यकुलपतीनाम् आचार्य वि.मुरलीधरशर्ममहाभागानां करकमलाभ्यां ई-पुस्तकालयः (e-Library) समुदघाट्यत । सन्दर्भेऽस्मिन् भाषमाणाः ते संस्कृतभाषायां विद्यमानाः प्राचीनतमाः ग्रन्थाः साम्प्रतं दुर्लभप्रायाः सन्तीत्यतः तादृशानर्घग्रन्थानां सङ्गणकीयपद्धत्या पत्रबिम्बकमाध्यमेन (Scanner) चित्रोत्तलनं विधाय विद्यापीठजालस्थाने अन्तर्जाले च ई-ग्रन्थालयप्रस्तुतीकरणम् अस्माकं प्रधानं लक्ष्यं स्यादिति स्वाभिप्रायमपोषिषुः । ई-ग्रन्थालयद्वारा प्रपञ्चस्य कस्मिंश्चिदपि कोणे स्थित्वा संस्कृतग्रन्थानाम् अध्ययनाय अवसरः प्राप्तुं शक्यते इति ते अवदन् ।

कार्यक्रमेऽस्मिन् शैक्षिकसङ्घायप्रमुखाः आचार्य राणीसदाशिवमूर्त्तिमहाशयाः, ग्रन्थालयाधिकारिणः डॉ.गिरिनायुडुवर्याः, ICT केन्द्रनिर्वाहकाः डॉ.चन्द्रशेखरमहोदयाः, आचार्यचक्रवर्तिरङ्गनाथन्महाभागाः तदितरे च अध्यापकाः कर्मचारिणश्च समुपस्थिता आसन् ।





## वरिष्ठाचार्यमूर्त्तिमहाभागानां भारतीयरेलविभागे सदस्यता



विद्यापीठस्य अद्वैतवेदान्तविभागस्य वरिष्ठाः आचार्याः भूतपूर्वप्रभारिकुलपतयः **आचार्य एम्.एल्.नरसिंहमूर्त्तिमहोदयाः** भारतीयरेलविभागस्य हिन्दीभाषाशिष्टसदसः (Hindi Language Advisory Board) सभ्यत्वेन निर्वाचिताः सन्ति । वर्षत्रयं यावत् इमे रेलविभागस्य कार्यालयीयहिन्दीभाषायाः प्रयोगसन्दर्भे समायोजितासु विचारविमर्शसभासु भागमूढ्वा परामर्शं प्रदास्यन्ति । प्रो.मूर्त्तिमहाभागाः संस्कृत-हिन्दी-कन्नड-तेलुगु-मलयालम-आंग्लभाषासु निपुणाः प्रवाचकाः भवन्ति । तेषामेतादृश-सदस्यत्वनिर्वाचनेन विद्यापीठस्य गौरवमभ्यवर्धत । अवसरेऽस्मिन् कुलपतिसमेताः सर्वेऽपि विद्यापीठाधिकारिणः, अध्यापकाः कर्मचारिणः, छात्राश्च तेभ्यः वर्धापनानि निवेदयन्ति ।

## विद्यापीठे श्रीलङ्कासंस्कृतविद्वान् बौद्धभिक्षुः इन्दनन्दः




भारतीयसंस्कृत-संस्कृतिनिर्वहणे राष्ट्रियसंस्कृतविद्यापीठं सदैव तत्परं दृश्यते । प्राचीनकाले यथा नालन्दा-तक्षशिला-विक्रमशिलादयः विश्वविद्यालयाः देश-विदेशेषु प्रसिद्धाः आसन्, तथैव भगवतः श्रीवेङ्कटेश्वरस्य पादपीठे विराजितस्य संस्कृतपीठस्य कीर्त्तिः दिक्षु विदिक्षु नितरां प्रसरति । आवर्षं विदेशात् नैके छात्राः, परिव्राजकाश्च पीठमिदं पठनायाथवा अनुसन्धानाय समागच्छन्त्येव । गतानुगतिकतया भारतस्य दक्षिणसमुद्रात् श्रीलङ्कादेशात् बौद्धसंन्यासिनः Welipitiye Indananda महाभागाः विद्यापीठ-परिभ्रमणार्थं संस्कृतसम्भाषणशिक्षणार्थञ्च समागता आसन् । संन्यासिन इमे श्रीलङ्कादेशे अनुराधापुरे बौद्धभिक्षून् भिक्षुविश्वविद्यालये संस्कृतं पाठयन्ति । पेराडेनियाविश्वविद्यालयात् (१९४२ ख्रीष्टाब्दे स्थापितात्) मौलिकसंस्कृतशिक्षणं सम्प्राप्य इमे तत्रैव साहित्य-व्याकरणयोः एम्.फिल्-उपाधिमलभन्त । Liverpool विश्वविद्यालयात् एम्.फिल् तथा Oxford विश्वविद्यालयात् डि.फिल् इति उपाधिलब्धधारिणः **डॉ.रोहना सेनेविरत्नेमहोदयाः** प्रसिद्धाः संस्कृतविद्वांसः एतेषां गुरवो भवन्ति । यद्यपि इमे संस्कृतशास्त्रेषु कृतभूरिपरिश्रमाः सन्ति, तथापि संस्कृतविश्वविद्यालयं समागत्य संस्कृतसम्भाषणावसरे तेषां वाक्स्खलनमभूदिति ते स्वयमङ्गीचकुर्वन् । ते अवोचन् — "I have a rich association with Sanskrit literature, but it is my lack of speaking skills in the language that has been bothering me. I came to Tirupati after I read about the Vidyapeetha online."

मान्यानां कुलपतीनां प्रेरणया तिरुपति-तिरुमल-देवस्थानस्य दूरदर्शने श्रीवेङ्कटेश्वरभक्तिप्रणालिकायां (SVBC) प्रचाल्यमान-संस्कृतसम्भाषणशिक्षणेन प्रभाविताः सन्ति नैके वैदेशिकाः । श्रमणानाम् इन्दनन्दमहोदयानाम् तिरुपतियात्रया विद्यापीठे प्राप्तानुभवस्य यथोचितप्रयोगः श्रीलङ्कायां भिक्षुविश्वविद्यालये अवश्यं भविष्यतीति वार्तापत्रिकाकाराणां साक्षात्कारेषु इमे स्वयमवोचन् । अधुना श्रीलङ्कायां भिक्षुविश्वविद्यालये चतुश्शतसंख्याकाः छात्राः पठन्ति, तेषु केवलं पञ्चविंशतिः (२५) भिक्षव एव संस्कृताध्येतारः सन्ति, ये सिंहलभाषामाध्यममनुकुर्वन्ति । लेखनशब्द-वाचिकशब्दयोर्मध्ये स्थितस्य व्यवधानस्य दूरीकरणाय संस्कृतसम्भाषण-शिविरणां महद्योगदानं भवतीति बौद्धभिक्षवः इन्दनन्दमहोदयाः अङ्गीकृत्य तिरुपतिस्थराष्ट्रियसंस्कृतविश्वविद्यालय-भिक्षुविश्व-विद्यालययोर्मध्ये अन्तस्सम्बन्धं विकचीकर्तुं बद्धपरिकराः अभूवन् । आगमिनिषु वर्षेषु उभयोर्मध्ये भाषा-संस्कृतिविनिमयः संस्कृतभाषामाध्यमेनावश्यं सम्भविष्यतीति प्रत्यश्रुण्वन् ।

## राष्ट्रियमानवाधिकारदिवसे चर्चासत्रम्




विगते दिसम्बरमासस्य दशमदिनाङ्के (10.12.2018) विद्यापीठस्य राष्ट्रियसेवायोजनापक्षतः "संस्कृतसाहित्ये मानवाधिकारः, तत्सम्परिपोषणे यूनां भूमिका" (Human Rights in Sanskrit Literature - the role of youth in managing with them) इति विषयमधिकृत्य एक-दिवसात्मकं चर्चासत्रमेकं समायोज्यत । कार्यक्रमेऽस्मिन् न्यायतन्त्रस्य (Judiciary) वरिष्ठाधिवक्तारः (Senior Advocate) **माडाभूसि डोराइ राजवर्याः** मुख्यातिथिपदं व्यभूषयन् । सन्दर्भेऽस्मिन् ते अवोचन् यत् — "मानवाधिकारः केनापि संविधानेन न प्रणीतः, एषः आप्राचीनकालात् निर्धारितोऽस्ति । ग्रीक्सभ्यतायाः समयादेव अस्य प्रचलनमासीत् । कोऽपि अस्य विकर्षणं साधयितुं न शक्नोति । संयुक्तराष्ट्रसङ्घेन (UNO) 1945 ख्रीष्टाब्दे प्रणीतधारायाणः 1.3 परोच्छेदे मानवाधिकारस्य, शान्तेः, गौरवस्य च विषये यथेष्टं विवरणं प्रदत्तमस्ति । तत्रापि विश्वभ्रातृत्वम्, राष्ट्रियतायाः अधिकारः इत्यादिविषये चर्चा कृता वर्तते । संस्कृतशास्त्रेष्वपि मानवा-धिकारस्य बहुधा विचारविमर्शः प्राप्यते ।" इति । विद्यापीठस्य मान्याः कुलपतयः सत्रेऽस्मिन् आध्यक्ष्यं निरवहन् । अधिकार-कर्तव्ययोर्मध्ये कश्चन सम्परायः दृश्यते इति अध्यक्षाणामाशय आसीत् । तैरुक्तम् — "Before asking for protection of rights, and individual should remember that he/she has certain responsibilities." शिक्षानुष्ठानेषु गुरुशिष्ययोः कर्तव्याकर्तव्यविषये बोधयन्तः मान्याः कुलपतयः मनुस्मृति-भगवद्गीता-उपनिषदामुदाहरणानि प्रास्तुवन् ।




सम्पूर्णस्य कार्यक्रमस्य संयोजकाः राष्ट्रियसेवायोजनायाः प्रकल्पाधिकारिणः **डॉ.आर्.चन्द्रशेखरमहोदयाः, डा.ओ.जि. कल्याणशास्त्रिवर्याश्च** आसन् । अवसरेऽस्मिन् राष्ट्रियसेवा-योजनायाः संयोजकाः आचार्यसत्यनारायणाचार्यमहोदयाः, कुलसचिवाः आचार्य जि.एस्.आर्.कृष्णमूर्त्तिवर्याः, अन्ये केरल-कर्णाटकादिप्रान्तेभ्यः समागताः विद्वांसः उपस्थिता आसन् ।

## थाईदेशे डॉ.ज्ञानरञ्जनपण्डावर्याः

विद्यापीठस्य साहित्यविभागे अध्यापनरताः सहाचार्याः डॉ.ज्ञानरञ्जनपण्डामहोदयाः थाईलैण्डदेशे व्याङ्कॉकनगरस्थ-शिल्पाकर्णविश्वविद्यालये "रामायणाधारेण बौद्ध-ब्राह्मण-हिन्दुधर्माः" (Buddhism, Brahmanism and Hinduism with special reference to Ramayana) इति विषयमधिकृत्य 02-03/03/2019 दिनाङ्कयोः समायोजिते अन्ताराष्ट्रियसम्मेलने भागं गृहीत्वा "Influence of the Ramayana on the life culture and literature in India" इति विषये पत्रं प्रास्तुवन् ।








## वेदभाष्यार्थकार्यशाला





विद्यापीठे 17.05.2019 दिनाङ्कात् 26.05.2019 दिनाङ्कं यावत् उज्जैनस्थमहर्षिसान्दीपनीराष्ट्रियवेदविद्याप्रतिष्ठानस्य वित्तसहयोगेन दशदिनव्यापिनी **वेदभाष्यार्थकार्यशाला** समायोज्यत । कार्यशालायामस्यां भारतस्य विविधराज्येभ्यः द्वाविंशतिः (२२) वैदिकविद्वांसः भागमगृह्णन् । महर्षिसान्दीपनीराष्ट्रियवेदविद्या-प्रतिष्ठानस्य मान्यसचिवानां प्रो.विरूपाक्ष वि.जड्डिपालमहोदयानाम् विद्यापीठस्य मान्यकुलपतीनाम् आचार्य वि.मुरलीधरशर्ममहोदयानां च समनुचिन्तनेन प्रारब्धायाः अस्याः कार्यशालायाः मुख्यमुख्यम् उद्देश्यमासीत् —

(१) वेदभाष्याणां सहयोगेन वेदार्थानां परिशीलनम् ।
(२) सामाजिकेषु वेदानां मौलिकार्थज्ञापनम् ।
(३) मीमांसा-व्याकरणादिशास्त्रैः वेदार्थप्रतिपादनम् ।
(४) आधुनिकानुसन्धानक्षेत्रे नवीनसोपानाविष्करणम् ।
(५) वैदिकवाङ्मयस्य परिशीलनम् ।
(६) वेदानामाधुनिकीकरणप्रक्रियापरिशीलनम् ।

सुनिश्चितप्रक्रियायामस्यां नैके वेद-व्याकरण-मीमांसापण्डिताः आधारपुरुषरूपेण समामन्त्र्यन्त । तेषु ब्रह्मश्रीचन्द्रशेखरघनपाठी, ब्रह्मश्रीसत्यवागीश्वरघनपाठी, आचार्य एस्.एस्.मूर्त्तिः, आचार्य के.इ.देवनाथन्, आचार्य ए.श्रीपादभट्टः, आचार्य सि.हेच्.श्रीरामशर्मा, विद्वान् गणेशशास्त्रिगल्, आचार्यतारकरामशर्मा, आचार्य के.गणपतिभट्टः, डॉ.निरञ्जनमिश्रः, श्रीकिरणभट्टः, डॉ.एन्.मुरली प्रमुखाः पाठ्यांशेषु विशिष्टव्याख्यानानि प्रास्तुवन् ।

दशदिनेषु निर्मितायां समयसारिण्यां ३६ कक्षाः निर्दिष्टा आसन् । तासु संस्कृतसम्भाषणार्थं दश कक्षाः, सङ्गणकाभ्यासार्थम् एका कक्षा, वेदभाष्यार्थानुचिन्तनार्थं च पञ्चविंशतिः (२५) कक्षाः निर्धारिता अभूवन् । विद्यापीठस्य कुलसचिवानाम् आचार्य जि.एस्.आर्.कृष्णमूर्त्तिमहाभागां स्वागतवचोभिः, मान्यकुलपतीनां प्रदीपदीपनेन महर्षिसान्दीपनीराष्ट्रियवेदविद्याप्रतीष्ठानात् समागतानां **आचार्यरवीन्द्र अम्बादासमूलेवर्याणाम् आचार्यविरूपाक्ष वि.जड्डिपालमहोदयानाञ्च** आतिथ्येन सनाथीकृता कार्यशाला 26.05.2019 दिनाङ्के अपराह्णे द्विवादने (2 P.M.) ब्रह्मश्री सत्यवागीश्वरघनपाठि-आचार्यश्रीपादसत्यनारायणमूर्त्तिमहोदययोः आतिथ्येन मान्यकुलपतीनां चाध्यक्ष्ये स्वस्तिवाचनिकमहोत्सवेन समाप्यत । कार्यशालाया अस्याः संयोजकाः डॉ.नारायणमहोदयाः, सहसंयोजकाश्च डॉ.निरञ्जनमिश्रमहाभागा आस्ताम् ।





# बाबासाहेव डा.भीमराव अम्बेदकरजन्मदिवसः




भारतरत्न-बाबासाहेव डॉ.भीमराव अम्बेदकरमहोदयानां जन्मदिनं पुरस्कृत्य भारतवर्षे सर्वत्र अप्रैलमासस्य चतुर्दशदिनाङ्कः अम्बेदकरजयन्ती अथवा भीमजयन्ती इति नाम्ना परिपाल्यते । तदनुकृत्य विद्यापीठेऽपि प्रतिवर्षमिव अस्मिन् वर्षे जन्मदिवसोत्सवः अयं महता वैभवेन 14.04.2019 दिनाङ्के पर्यपाल्यत । अस्मिन् उत्सवे श्रीवेङ्कटेश्वरचिकित्साविज्ञानकेन्द्रस्य (SVIMS) भूतपूर्व-कुलसचिवाः **आचार्य वि.एस्.आर्.आञ्जनेयुलुमहाभागाः** मुख्यातिथयः तथा च तिरुपतिस्थश्रीपद्मावतीमहिलाविश्वविद्यालयस्य आचार्या **आचार्यश्रीकोलाकालुरीमधुज्योतिमहाभागाः** सारस्वतातिथयः आसन् । आचार्यरमारञ्जमुखर्जिसभाङ्गणे समायोजितायाः सभायाः अध्यक्षाः विद्यापीठस्य मान्याः कुलपतयः **आचार्य वि.मुरलीधरशर्मवर्याः** आसन् । तेलुगुविभागस्य वरिष्ठाध्यापकाः **डॉ.डि.नल्लानामहाभागाः** सभां समचायलयन् । सर्वेऽपि विद्यापीठस्य कुलसचिवसमेताः अध्यापकाः, कर्मचारिणः, छात्राः अवसरेऽस्मिन् समुपस्थाय अम्बेदकरमहोदयानां चित्रफलके पुष्पाञ्जलिं समार्पयन् ।

# बृहत्संस्कृतसाहित्यविज्ञानकोषनिर्माणविषयिणी द्विदिवसीयराष्ट्रियसङ्गोष्ठी

## A Two Days National Seminar on "Preparation of Encyclopaedia of the Technical Terms in Sanskrit Poetics - Bharata's Times



साहित्यसंस्कृतिसङ्कायान्तर्गततया विद्यमानेन साहित्यविभागेन 2019 वर्षस्य मार्चमासस्य 26 तथा 27 दिनाङ्कयोः विश्वविद्यालयानुदानायोगपक्षतः (UGC) प्रचाल्यमाने विशिष्टसहायताकार्यक्रमाङ्गतया (Special Assistance Programme) "बृहत्संस्कृतसाहित्यविज्ञानकोषनिर्माणम् - भरतमुनेः प्रारभ्य" इति विषयमधिकृत्य एका द्विदिवसीया राष्ट्रियसङ्गोष्ठी विदुषां समवायसमुपस्थित्या विद्यापीठप्राङ्गणे समायोज्यत ।

कार्यक्रमस्यास्य उद्घाटनसत्रं २६.०३.२०१६ दिनाङ्के प्रातः दशवादने कुलसचिवानाम् **आचार्य जि.एस्.आर्.कृष्णमूर्त्तिमहाभागानाम्** स्वागतभाषणेनारभ्यत । परियोजानाः संयोजिकाः साहित्यविभागाचार्याः डॉ.सि.ललिताराणीमहाभागाः सङ्गोष्ठ्याः उद्देश्यकथनेन सह परियोजनानिवेदिकां न्यवेदयन् । अस्मिन् हैदराबादस्थ-उस्मानियाविश्वविद्यालयस्य विश्रान्ताचार्या आचार्य **पि.शशिरेखामहाभागाः** बीजभाषणमुपास्थापयन् । तिरुपति-तिरुमलदेवस्थानस्य पुराणेतिहासपरियोजनायाः विशिष्टाधिकारिणः **महामहोपाध्यायाः आचार्य समुद्राललक्ष्मणय्यामहोदयाः** मुख्यातिथयः तथा च विद्यापीठस्य मान्याः कुलपतयः **आचार्य वि.मुरलीधरशर्म**-महाशयाः अध्यक्षाः आसन् । सम्पूर्णस्य कार्यक्रमस्य सञ्चालनं साहित्यविभागाचार्यैः **डॉ.सि.रङ्गनाथन्महाभागैः** अक्रियत । परियोजनायाः उपसंयोजकाः डॉ.के.राजगोपालन्महोदयाः समागतेभ्यः अतिथिभ्यः कृतज्ञताः प्रकट्यकुर्वन् । ततः क्रमशः दिनद्वये समुदायतया पञ्चसत्राणिं आसन्, यत्र भारतस्य विविधप्रान्तेभ्यः समागताः विद्वांसः स्वीयशोधपत्राणि प्रास्तुवन् ।







**।। प्रथमसत्रम् — ध्वनितत्त्वविमर्शः ।।**

अध्यक्षः — प्रो.पि.वरप्रसादमूर्त्तिः – ध्वन्यालोके मङ्गलपद्म् ।
सञ्चालयः — प्रो.सि.रङ्गनाथन्

**पत्रप्रस्तौतार:/विषयाः**

१) डॉ.बुद्धेश्वरषडङ्गी — ध्वनितत्त्वप्रतिपादनावसरे भूमिका ।
२) डॉ.यु.वि.रमणमूर्त्तिः — ध्वनेः पदप्रकाशता ।
३) डॉ.ज्ञानरञ्जनपण्डा — ध्वन्यभाववादिनामभिप्रयाः ।

**।। द्वितीयसत्रम् — चित्रकाव्यमीमांसावृत्तिः ।।**

अध्यक्षः — डॉ.डि.रामकृष्णः — यमकालङ्कारः ।
सञ्चालयः — डॉ.भारतभूषणरथः

**पत्रप्रस्तौतार:/विषयाः**

१) डॉ.राजेन्द्रजैनः — कैशिकीवृत्तिः ।
२) डॉ.जि.शिरीषा — व्यतिरेकालङ्कारः ।
३) डॉ.अजयकुमारनन्दः — चित्रकाव्यस्य वैविध्यम् ।
४) डॉ.बि.बालशिवकुमारः — अर्थापत्तिः ।

**।। तृतीयसत्रम् — नाट्यसंग्रहः ।।**

अध्यक्षः — आचार्य राणीसदाशिवमूर्त्तिः – नाट्यविषयसंग्रहः ।
सञ्चालयः — डॉ.जे.बि.चक्रवर्ती

**पत्रप्रस्तौतार:/विषयाः**

१) डॉ.जि.पद्मनाभवन् — खण्डकाव्यानि ।
२) डॉ.सि.रङ्गनाथन् — रसेषु भावविनिमयः ।
३) डॉ.प्रदीपकुमारबाग् — रसस्यालौकिकत्वसिद्धिः ।

**।। चतुर्थसत्रम् — शब्दवृत्तिविमर्शः रसविमर्शश्च ।।**

अध्यक्षः — प्रो.जि.एस्.आर्.कृष्णमूर्त्तिः — रसविमर्शः ।
सञ्चालयः — डॉ.ज्ञानरञ्जनपण्डा

**पत्रप्रस्तौतार:/विषयाः**

१) डॉ.के.लीनाचन्द्रा — तात्पर्यवृत्तिः ।
२) डॉ.वि.सूर्यप्रभा — अर्थव्यञ्जकता ।

**।। पञ्चमसत्रम् — वस्तुभेदाः पञ्चसन्धयश्च ।।**

अध्यक्षः — आचार्य शङ्करनारायणः — वस्तुभेदाः ।
सञ्चालयः — आचार्य के.राजगोपालन्

**पत्रप्रस्तौतार:/विषयाः**

१) आचार्य सि.ललिताराणी — अपह्नुतिः ।
२) डॉ.के.राजगोपालन् — मुखसन्धिः ।
३) डॉ.भारतभूषणरथः — उपरूपकभेदाः ।
४) डॉ.जे.बि.चक्रवर्ती — प्रतिमुखसन्धिः ।

विद्यापीठस्य शोधच्छात्राणां कृते समायोजिते विशिष्टसत्रे श्रीदीपेन्द्रजोशी, डॉ.रागी वेङ्कटाचारी, एस्.तिरुमलरेड्डी, टि.सचीनशर्मा, डा.जि.लक्ष्मीनारायणः, मनोजकुमारपण्डा, ई.उमागौतमी, एम्.माधुरीकामेश्वरी, किरणभट्टः, सुमनमुखोपाध्यायः, प्रणीतकुमारपण्डा, ऐश्वर्या सि. प्रमुखाः स्वीयानुसन्धानमूलकानि पत्राणि प्रास्तुवन् ।

**।। समापनसमारोहः ।।**

कार्यक्रमस्य स्वस्तिवाचनिकमहोत्सवः २७.०३.२०१९ दिनाङ्के अपराह्णे २.३० वादने समायोज्यत । अत्र आचार्याः पि.शशिरेखामहाभागाः मुख्यातिथयः, मान्याः कुलपतयः आचार्य वि.मुरलीधरशर्ममहोदयाः अध्यक्षाः आसन् । सभान्ते डॉ.भारत भूषणरथः धन्यवादान् समार्पयन् ।





# अध्यापकप्रशिक्षणकार्यक्रमः

## Faculty Development Programme on “Modern Research Issues in Sanskrit lore”



आधुनिकानुसन्धानक्षेत्रे संस्कृतभाषासाहित्यम् आधारीकृत्य अनुभूयमानानां समस्यानां सन्दर्भान् पुरस्कृत्य “Modern Research Issues in Sanskrit Lore” इति विषयं पुरस्कृत्य राष्ट्रियसंस्कृतविद्यापीठे एकः सप्ताहव्यापी अध्यापक-प्रशिक्षणकार्यक्रमः 26.12.2018 दिनाङ्कात् प्रारभ्य 31.12.2018 दिनाङ्कं यावत् प्राचाल्यत ।

कार्यक्रमस्यास्य समुद्घाटनसमारोहे विद्यापीठस्य मान्याः कुलपतयः **आचार्य वि.मुरलीधरशर्म**महोदयाः आध्यक्ष्यं निर्वहन्तः प्राचीनार्वाचीनानां शैक्षिक-शास्त्रीयानुसन्धानविधीनां विषये पर्यालोचनमकुर्वन् । आधुनिकसमस्याः अधिकृत्य संस्कृतानु-सन्धानस्य परिसरः विस्तारणीयः, नवीनविधीनामुपयोगः करणीयः इति तेषां भाषणस्य सारः आसीत् । कार्यक्रमस्य संयोजकाः डॉ.के.विश्वनाथमहाभागाः आसन् । प्रशिक्षणवर्गेऽस्मिन् समाहूताः विद्वांसः अधोलिखितान् विषयान् अचर्चिषुः । यथा —

१) आचार्यः एन्.के.सुन्दरेशन् — “Explorable areas in Ancient Indian Knowledge System”.
२) आचार्य साईरामशर्मा — “न्यायरत्नावली - एकमध्ययनम् ।”
३) आचार्य आर्.दीप्ता — “Post Colonian Studies.”
४) आचार्य का.ई.देवनाथन् — “शाब्दबोधप्रक्रियायां शोधनावकाशाः”, “शोधने न्यायपरिभाषायाः उपयोगः” ।
५) आचार्यजि.एस्.आर्.कृष्णमूर्त्तिः — नाट्यरसाः योगानुकूलाः, सर्वशास्त्राणां शोधने साहित्यस्योपयोगः ।
६) आचार्य राणीसदाशिवमूर्त्तिः — “Ancient Indian Management System.”
७) डा.शङ्करनारायणन् — “Research Methodology”

एवं विदुषां व्याख्यानानि श्रुत्वा भागग्राहिणः विद्यापीठीयाः अध्यापकाः, अन्ये च बहिस्थाः सामूहिकविमर्शमकुर्वन् । प्रतिदिनं व्याख्यानान्ते भागग्रहीतॄणां सङ्गोष्ठी अपि समायोज्यत । एवं सर्वतोमुखेन कार्यक्रमोऽयम् संस्कृतभाषासाहित्यक्षेत्रे आधुनिकानुसन्धानाय बहुधा उपकारक आसीत् ।

# अखिलभारतशास्त्रार्थप्रशिक्षणवर्गः



राष्ट्रियसंस्कृतविद्यापीठेनानेन 2000, 2003, 2017 एवं 2018 वर्षेषु प्रचालितः **अखिलभारतशास्त्रार्थप्रशिक्षण-वर्गः** अस्मिन्नपि 2019 वत्सरे प्राचाल्यत । कार्यक्रमेऽस्मिन् भागग्रहणार्थं विविधविश्वविद्यालयेभ्यः शोधच्छात्राणां 110 अभ्यर्थनापत्राणि अप्राप्यन्त । तेषु प्रवेशपरीक्षार्थमुपस्थितेभ्यः 80 छात्रेभ्यः न्याय-व्याकरण-पूर्वमीमांसा-ज्यौतिष-साहित्य-अद्वैत-वेदान्ताशास्त्रेषु 64 उत्तीर्णाः छात्रा चिता अभूवन् । कार्यक्रमस्य उद्घाटनं 31.05.2018 दिनाङ्के आर्.आर्.मुखर्जिसभाङ्गणे अभूत् ।








वैदिकमङ्गलाचरण-प्रदीपप्रज्ज्वालनाभ्यां प्रारब्धे उद्घाटनसत्रे वर्गस्यास्य समायोजकाः आचार्याः ओ.श्रीरामलालशर्माणः वर्गस्योद्देश्यानि विवृत्य सर्वेषां स्वागतं व्याहरन् । श्रीमन्तः **महामहोपाध्यायाः विश्वनाथगोपालकृष्णशास्त्रिमहाभागाः** अस्य कार्यक्रमस्य मुख्यातिथिपदं व्यभूषयन्तः व्याकरणशास्त्रे वाक्यार्थं कृत्वा कार्यक्रमः यशस्वी भूयादिति, छात्राः सर्वे शास्त्रार्थकुशलाः भवेयुरिति च आशिषः अब्रुवन् । विद्यापीठस्य कुलपयः **आचार्याः वि.मुरलीधरशर्माणः** कार्यक्रमस्यास्य आध्यक्ष्यम् ऊढ्वा छात्रान् सर्वानपि विद्यासमुपार्जनाय शास्त्रार्थ-करणकौशलसम्पादनाय च प्रैरयन् । अन्ते डा.ओजि.पि.कल्याण-शास्त्रिभिः धन्यवादाः सर्वेभ्यः समर्पिताः ।

तदनु ०१.०६.२०१९ दिनाङ्के प्रातः ८.०० वादने पाठाः प्रारब्धाः । प्रतिदिनं सर्वेऽपि छात्राः एकया निर्दिष्टसमयसारण्या अभिप्रेरिताः प्रातरुत्थानात्प्रारभ्य रात्रिशयनं यावत् नित्यकर्म, अध्ययनम्, मनोरञ्जनम्, वादविवादः, अनुचिन्तनम् इतिदिषु नैकेषु कर्मसु निरता आसन् । शारीरिकसुस्थतायै उषःकाले योगाभ्यासः, प्राणायामः व्यायामः इत्यादीनां प्रशिक्षणमपि प्रदत्तमासीत् ।

१५.०६.२०१९ दिनाङ्के स्थिरवासरे सायं ६.०० वादने वर्गस्यास्य समापनमहोत्सवः शिक्षाशास्त्रभवने सम्पन्नः । मङ्गलाचरणपुरस्सरमयं प्रारब्धेऽस्मिन् कार्यक्रमे अतिथीनां स्वागतं आचार्य ओ.रामलालशर्माणं व्याहरन् । भागग्रहीतृषु **यश्वन्तकुमार-त्रिवेदी, रमणभरद्वाजः, श्रद्धोपाध्यायश्च** वर्गेऽस्मिन् स्वीयान् अनुभवान् प्राकटयन् । श्रीमन्तः **म.म.डॉ.मणिद्राविडशास्त्रिणः** कार्यक्रमस्य मुख्यातिथिपदं विभूषयन्तः सर्वे छात्राः एतस्मिन् वर्गे शास्त्रार्थकरणाभ्यासश्रमं कृतवन्तः इति सन्तोषं प्रकटय्य एवमेव अग्रेऽपि अयं कार्यक्रमः अनुवर्तनीयः इत्युपादिशन् । सर्वेभ्यः छात्राभ्यः प्रमाणपत्राणि श्रीपतिभिः मुख्यातिथिभिश्च वितीर्णानि । अन्ते धन्यवादसमर्पणानन्तरं वैदिकेन मङ्गलाचरणेन अयं कार्यक्रमः साधु समापितः ।

# राष्ट्रियार्हतापरीक्षायां (NET/JRF) - छात्रसफलता


**नन्दुलालमण्डलः**
शिक्षाशास्त्रे NET


**खोकनप्रामाणिकः**
संस्कृते(C-25)NET


**के.मनोज्ञा**
संस्कृते(C-73)JRF


**देवव्रतसर्दार**
संस्कृते(C-25)NET

अभिनन्दनानि


**अरविन्दनायकः**
संस्कृते(C-25)NET


**कोल्लु सङ्कीर्त्तिः**
सङ्गणकविज्ञाने - NET


**वि.नरेशकुमारः**
शिक्षाशास्त्रे-NET

अभिनन्दनानि

## श्रीरामानुजाचार्यप्रकल्पकार्यशाला



महामान्यकुलाधिपतीनां मानसपुत्रः (Brain Child) श्रीरामानुजाचार्यसाहित्यसम्पादनप्रकल्पः भारतसर्वकारस्य संस्कृतिविभागानुकूल्येन विद्यापीठे प्रचलति । अस्य प्रकल्पस्य द्वितीयराष्ट्रियकार्यशाला विगते 20.03.2018 दिनाङ्के समायोजिता आसीत्, यत्र भारतस्य विविधकोणेभ्यः त्रिंशत्संख्याकाः विद्वांसः भागमगृह्णन् । नानामातृकालयेभ्यः संगृहीतानां मातृकाणां परिशीलनम्, सम्पादितपाठस्य मूल्याङ्कनम्, मुद्रणदोषनिराकरणम् इत्यादिषु सन्दर्भेषु विदुषां योगदानमासीत् । अद्यावधि प्रकल्पसहयोगिभिः संगृहीतमातृकासु — (१) शङ्करहृदयानन्दम् (२) चम्पकेशेयम् (३) सुबोधिनी -१ (४) अस्तिब्रह्महेतिश्रुत्यर्थविचारः (५) भेददर्पणः (६) श्रुतप्रकाशिकासंग्रहः (७) सुबोधिनी -२ (८) न्यायप्रकाशः (प्रथम-द्वितीयभागौ) (९) न्यायमणिकलिका इत्यादयः प्रसिद्धाः सन्ति ।

समायोजितायां कार्यशालायां मुख्यातिथित्वेन समागताः मान्याः कुलपतयः आचार्य वि.मुरलीधरशर्ममहाभागाः विद्यापीठेन मातृकाणाम् अङ्कीकरणम् (Digitization), सम्पादनम् (Editing) तथा प्रकाशनम् (Publication) इत्यादीनां निर्वहणे सर्वदा कार्यं क्रियते, एवं सति श्रीमद्भगवद्रामानुजाचार्याणां शताधिक-मातृकाणां सम्पादनमपि OCR (Optical Character Recognition) प्रक्रियाम् उपयुज्य स्वल्पीयसि काले कर्तुं शक्यत इति दृढमघोषयन् । कार्यशालायां समुपस्थितानां विदुषां स्वागतं प्रकल्पनिदेशकाः आचार्य का.ई.देवनाथन्महोदयाः अकुर्वन् । समागतेषु विद्वत्प्रवरेषु आचार्याः एम्.एल्.एन्.मूर्त्तिमहाभागाः, आचार्य पि.टि.जि.वै.सम्पत्कुमाराचार्याः, आचार्य सि.राघवन्वर्याः, डॉ.टि.यस्.आर्.नारायण-डॉ.मुकुन्दन्-डॉ.के.ई.वेङ्कटनाथन्-डॉ.सौम्यनारायण-डॉ.के.टि.वि.राघवन्प्रमुखाः आसन् । सम्पूर्णस्य कार्यक्रमस्य सञ्चालनम् आचार्य सि.रङ्गनाथन्महोदयैः कृतम् ।

## अन्ताराष्ट्रियोगदिवसं पुरस्कृत्य
## ग्रीष्मकालिकयोगचिकित्साशिबिरम्



विद्यापीठे विश्वविद्यालयानुदानायोगस्य निदेशानुसारेण पञ्चमः अन्ताराष्ट्रियोगदिवसः **21.06.2019** तमे दिनाङ्के प्रातः **6.30** तः प्रारभ्य प्रातः **11.30** समयं यावत् विद्यापिठस्य योगविज्ञानविभाग-राष्ट्रियसेवायोजनापक्षतः पर्यपाल्यत । कार्यक्रमस्यारम्भः विद्यापीठवैभवमार्गे विद्यमानाय महर्षिपतञ्जलेः विग्रहाय माल्यार्पणेन समभूत् । सन्दर्भेऽस्मिन् समायोजितायां सभायां मान्याः कुलपतयः **आचार्य वि.मुरलीधरशर्म**महोदयाः आध्यक्ष्यं निर्वहन्तः सहस्रवर्षेभ्यः पूर्वं महर्षिपतञ्जलिना संस्कृतभाषायां स्वास्थ्यरक्षार्थं यद्दिव्यौषधसदृशमुपायं समाजाय प्रदत्तं तस्य परिपालनेन पूर्णाङ्गमानवस्य विकासेन सह राष्ट्रस्यापि विकासः सम्भविष्यतीति प्राबोधयन् । अन्तर्दौवारिकक्रीडाङ्गणे (Indoor Stadium) सर्वेऽपि विद्यापीठस्यान्तेवासिनः, अध्यापकाः, कर्मचारिणश्च योगासनाभ्यासमकुर्वन् । जनमानसे योगविद्याप्रसाराय तिरुपतिनगरे शोभायात्रायाः समनन्तरं समूहे यौगिकाहारवितरणमभूत् । छात्रेषु प्रबन्धलेखन-भाषण-योगासनादि-विषये विविधाः प्रतिस्पर्धाः समायोजिताः ।





आधुनिकवातावरणसमस्याबहुलसमाजे योगाभ्यासं विना न कोऽपि उत्तमस्वास्थ्यं प्राप्तुं प्रभवति इति धिया मान्यानां कुलपतीनां प्रचोदनायाम् विद्यापीठे **01.05.2019** दिनाङ्कात् प्रारभ्य षड् दिनानि यावत् विशिष्टतया सार्वजनिकं ग्रीष्मकालिक-योग्याभ्यासचिकित्साशिबिरं समायोजितमासीत् । तत्र तिरुपतिवास्तव्याः प्रायशः शताधिकाः जनाः अस्मिन् शिबिरे भागमगृह्णन् । अत्र प्रामुख्येन योगासनानि, प्राणायामः, ध्यानम्, संस्कृतश्लोकोच्चारणम्, भगवद्गीताभ्यासः इत्यादिभिः hypertension, backache, diabetes इत्यादीनां दुःसाध्यरोगाणां निवारणाय उपायाः अभ्यस्ताः । एवम् अन्ताराष्ट्रियोगदिवसस्य अधोलिखिताः कार्यक्रमाः निर्दिष्टा आसन् । यथा —






1. Special Puja to Maharshi Patanjali Stature
2. Yoga Prayer
3. Inaugural address by chief guest
4. Common Yoga Protocol
5. Distribution of yogic diet
6. Yoga Awareness Rally
7. Refreshments to Participants
8. Valedictory function and prize distribution.

## महर्षिबादरायणव्याससम्मानिता – प्रो.के.कादम्बिनी




**डॉ.श्रीमती के.कादम्बिनी**, शिक्षाशास्त्रविभागस्य आचार्या गते **04.04.2019** दिनाङ्के नवदेहलीस्थे अशोकावासातिथ्यगेहे दीक्षान्तसभाङ्गणे समयोजिते कार्यक्रमे भारतस्य महामान्योपराष्ट्रपतिवर्याणां **श्री एम्.वेङ्कैय्य नाइडुमहोदयानां** करकमलाभ्यां संस्कृतसाहित्यम्, शिक्षाशास्त्रम्, गणतन्त्रविज्ञानं प्रति तस्याः महद्योगदानाय भारतस्य प्रतिष्ठितेन **महर्षिबादरायणव्याससम्मानेन** विभूष्यते ।

# विद्यापीठीयाध्यापकानां कर्मचारिणां च पदोन्नतिः

## TEACHING FACULTIES

### ASSOCIATE PROFESSOR TO PROFESSOR



E.No. T200411191
**DR. K.KADAMBINI**
D.O.P. - 17.01.2019

### ASSISTANT PROFESSOR TO ASSOCIATE PROFESSOR



E.No. T200210198
**DR.K.VISWANATHA**
D.O.P. 28.05.2017



E.No. T200401186
**DR.KRISHNESWAR JHA**
D.O.P. 16.06.2017



E.No. T200406187
**DR.R.CHANDRA SEKHAR**
D.O.P. 01.04.2018

### ASSISTANT PROFESSOR LEVEL 11 TO LEVEL 12



E.No.T200911202
**Dr.Sitansu Bhushan Panda**
D.O.P. 19.11.2018



E.No.T200901203
**Dr.Paramita Panda**
D.O.P.19.11.2018



E.No.T200907205
**Dr.D.Jyothi**
D.O.P. 19.11.2018



E.No. T200607197
Dr.Narayan
D.O.P. 22.12.2018



E.No. T200904206
**Dr.Niranjan Mishra**
D.O.P. 23.11.2018



E.No. T200901207
**Dr.D.Nallanna**
D.O.P. 27.11.2018

## NON-TEACHING STAFF



E.No. N201204233
**Ms.K.Madhumitha**
L.D. Clerk to U.D.Clerk
D.O.P. 05.06.2019



E.No. N200405176
**Sri A.Bhaskar Reddy**
Semi.Prof. to Prof.Asst.
D.O.P. 10.02.2019



E.No. N200408184
**Sri J.L.Srinivas**
Data Entry Op. to Asstant
D.O.P. 05.06.2019

सर्वेभ्यः अभिनन्दनानि



E.No. N199209123
**Sri P.Krupakar**
Assistant to S.O.
D.O.P. 05.06.2019



E.No. N199412127
**Sri P.Balasubramanyam**
Computer Op. to Assistant
D.O.P. 05.06.2019



E.No. N199712144
**Sri G.Channakesavulu**
U.D.Clerk to Assistant
D.O.P. 05.06.2019





# आलेख्यवार्ताः



राष्ट्रियसंस्कृतविद्यापीठस्य उत्कलपीठे प्रतिष्ठापितश्रीयोगमन्दिरात् विश्वप्रसिद्धश्रीजगन्नाथदेवस्य रथयात्रा महता वैभवेन मान्यकुलपतीनाम् आचार्य वि.मुरलीधरमहोदयानां समुपस्थितौ विद्यापीठान्तेवासिभिः तिरुपतिनगरवासिभिश्च समपाल्यत । अस्य सम्पूर्णकार्यस्य व्यवस्थापनायै अन्ताराष्ट्रियश्रीकृष्णचेतनासङ्घस्य सहयोगः लब्धः । आनन्दमयवातावरणे श्रीविग्रहाणां शोभायात्रा सम्पूर्णतिरुपतिनगरे विसारिता ।



वाराणसीनगरे संस्कृतभारतीपक्षतः समायोजितायामखिलभारतीय-शास्त्रीयमीमांसाशलाकापरीक्षायां तृतीयस्थानं प्राप्तवते सिद्धार्थशङ्कर-पण्डावर्याय शास्त्रिच्छात्राय धनराशि-प्रमाणपत्र-पुरस्कारः



2019-2020 शैक्षिकवर्षे शिक्षाशास्त्रि-शिक्षाचार्य-विशिष्टाचार्य-विद्यावारिधिकक्षासु प्रवेशार्थं समायोजितप्रवेशपरीक्षायाः फलोद्घोषणकार्यक्रमे मान्यैः कुलपतिभिः सह समितिसदस्याः ।



२०१८-२०१९ शैक्षिकवर्षस्य वर्षिकक्रीडास्पर्धासु कुलपति-कुलसचिव-सङ्घायप्रमुखेभ्यः बालिकाछात्रागणे विजयवैजयन्तीं स्वीकुर्वती वि.नलिनी



२०१८-२०१९ शैक्षिकवर्षस्य वर्षिकक्रीडास्पर्धासु कुलपति-कुलसचिव-सङ्घायप्रमुखेभ्यः महिलाकर्मचारिवर्गे विजयवैजयन्तीं स्वीकुर्वती डॉ.के.लीनाचन्द्रा ।

# विद्यापीठप्रकाशनानि




## महस्विनी

राष्ट्रियसंस्कृतविद्यापीठस्य षाण्मासिकी-शोधपत्रिकायाः दशमकुशुमम् । ग्रन्थेऽस्मिन् षोडशशोधलेखाः प्रकाशिताः ।

**प्रधानसम्पादकः**

**आचार्य वि.मुरलीधरशर्मा**

सम्पादकः : **प्रो.कोराडसूर्यनारायणः**




## भास्करीयबीजगणितम्

**वेणुगोपाल डि.हेरूर् महोदयैः** आंग्लभाषया ग्रथितेऽस्मिन् ग्रन्थे ज्योतिर्विदः भास्कराचार्यस्य गणितविज्ञानं स्पष्टतया नवीनोदाहरणैः उपस्थापितम् । ग्रन्थेऽस्मिन् क्रमशः धनर्ण–ख-अव्यक्तकल्पना-अनेकवर्ण-करणी-कुट्टक-वर्ग-चक्रवाल-वर्णसमीकरण-मध्यमाहरणादि-विषयाः वर्तन्ते ।




## श्रीचैतन्यचित्रकथा

**डॉ.निरञ्जनमिश्रमहोदयैः** सम्पादितेऽस्मिन् ग्रन्थे गौडीयवैष्णवधर्मप्रवर्तकस्य अचिन्त्यभेदाभेददर्शनप्रवक्तुः महाप्रभोः श्रीचैतन्यस्य सम्पूर्णजीवनवृत्तान्तः चित्रमाध्यमेन प्रदर्शिताः सन्ति । डॉ.दीनबन्धुमहारणामहोदयैः सचित्रम् ओडिआभाषया प्रणीतः ग्रन्थः संस्कृताङ्ग्लभाषया अनूद्य विद्यापीठस्योत्कलपीठपक्षतः प्रकाशितोऽस्ति ।




## पञ्चलक्षणी सिंहव्याघ्रलक्षणे च

**प्रो.एन्.एस्.रामानुजताताचार्याणां** दीधितिप्रकाशिकाव्याख्यया सह प्रकाशितोऽयं ग्रन्थः श्रीगदाधरभट्टाचार्य-विरचितायाः तत्त्वचिन्तामणिदीधित-प्रकाशिकाव्याख्यायाः पञ्चलक्षणीभागः अस्ति । अयं ग्रन्थः ग्रन्थसम्पादकानां सरलविवरणेन सह महितो भवति । इदं तृतीयवारं प्रकाश्यते ।




## मीमांसाशास्त्रप्रवेशिनी

**डॉ.श्रीराम ए.एस्. वर्येण** प्रणीतेऽस्मिन् ग्रन्थे(प्रथमे भागे) महर्षिणा जैमिनिना प्रणीतस्य मीमांसादर्शनस्य दुर्बोध्यविषयाः विविधेषु पाठेषु विभज्य सप्रयोजन-प्राधान्य-पाठ-पाठसार-अभ्यास-परियोजनादयः सुष्ठु उपन्यस्ताः । दर्शनपरिचयः, अष्टौ धर्मप्रामाण्यानि, द्रव्यादिप्रमेयाः, मीमांसाशास्त्रकाराः इत्यादयः विषयाः प्राधान्येन सङ्कलिताः ।




## मीमांसाशास्त्रप्रवेशिनी

**डॉ.श्रीराम ए.एस्. वर्येण** प्रणीतेऽस्मिन् ग्रन्थे (द्वितीयभागे) सप्रयोजन-शास्त्रप्राधान्य-पाठ-पाठसार-अभ्यास-परि-योजनादिभिस्सह अष्टसु परिच्छेदेषु अङ्गत्व-गुणविधि-श्रुति-श्रुतिविभाग-लिङ्ग-वाक्य-प्रकरण-समाख्या-गुणकर्म-प्रयुक्त्यादिनैके विषयाः प्राधान्येन सङ्कलिताः । मीमांसा शास्त्रजिज्ञासूनां कृते ग्रन्थद्वयं प्राथमिकस्तरे सरलं सुबोध्यं च भवति ।




## संस्कृतव्याकरणशास्त्रप्रवेशिनी

**आचार्य जे.रामकृष्णमहोदयानां मार्गदर्शनेन डॉ.शिवकुमारी कादुरि-**प्रणीतेऽस्मिन् ग्रन्थे प्राथमिकस्तरे संस्कृत-व्याकरणशास्त्राध्ययनार्थं सन्धि-कारक-समासानां विषये सरलभाषया विषयाः उपन्यस्ताः । ग्रन्थोऽयं त्रिभिः प्रकरणैः विभक्तः । प्रतिप्रकरणं नैके पाठाः सन्ति । पाठस्यादौ प्रयोजनं, ततः पाठस्य सारः प्रोच्यते । पाठेन सह सर्वत्र अभ्यासः प्रदत्तोऽस्ति । एतेन पठितुः तत्तत्पाठसम्बन्धिनी सूक्ष्मा बुद्धिः संवर्धते ।




## संस्कृतसाहित्यशास्त्रप्रवेशिनी

**आचार्य जि.एस्.आर्.कृष्णमूर्त्तिमहोदयानां मार्गदर्शने डॉ.सिहेच्.नागराजुप्रणीतेऽस्मिन्** ग्रन्थे सरलया भाषया निर्विवाद-संवादैः साहित्य-शास्त्रस्य परिचयः, इतिहासपुराणानि, पञ्चमहा-काव्यानि, गद्यकाव्यम्, चम्पूकाव्यम्, पञ्च महा-नाटकानि, अलङ्कारशास्त्रस्य आचार्याः, काव्यप्रमेय-विषयाः इति अष्टौ खण्डाः विद्यन्ते । एतेषु त्रयस्त्रिंशत्पाठाः सन्ति । बहुविधैः अभ्यासैः सह विषयाणां सरलभाषया उपस्थापनाऽत्र प्राप्यते ।

न कालमपेक्षते स्नेहः (Affection brooks not delay)



# आचार्य नागमुनिरेड्डीमहोदयानां सेवानिवृत्तिः



**आचार्याः नागमुनिरेड्डिमहाभागाः**, लब्धप्रतिष्ठाः शिक्षाशास्त्रविदः ज्योतिषशास्त्रनिपुणाः छात्रवत्सलाः हसन्मुखाः विद्यापीठेऽस्मिन् **1980** ख्रीष्टाब्दात् प्रायशः दशाब्दिचतुष्टयं यावत् शिक्षाशास्त्रपदवीं विभूषयन्तः विगते **30.06.2019**तमे दिनाङ्के सेवानिवृत्ताः अभूवन् । सन्दर्भेऽस्मिन् तेषां सम्बर्धनार्थं शिक्षाशास्त्रविभागपक्षतः सम्बर्द्धनासभा एका समायोजिता, यत्र रेड्डिमहोदयानां परिवारसदस्याः, विद्यापीठस्य अध्यापकाः, कर्मचारिणः, छात्राश्च समुपस्थाय तेषां महाभागानां लब्धावसरजीवनं मङ्गलमयं सुखमयं समृद्धिमयं भवतु इति भगवतः श्रीवेङ्कटेश्वरस्य चरणारविन्दयोः समप्रार्थयन् ।

# महर्षिबादरायणव्याससम्मानितः – डॉ.नन्दीमुरली




**डॉ.नन्दीमुरली**, ICT Lab कर्मचारी गते **04.04.2019** दिनाङ्के नवदेहलीस्थे अशोकातिथ्यगेहे दीक्षान्तसभाङ्गणे समयोजिते कार्यक्रमे भारतस्य महामान्योपराष्ट्रपतिवर्याणां **श्री एम्.वेङ्कैय्य नाइडुमहोदयानां** करकमलाभ्यां संस्कृतसाहित्यम्, गणतन्त्रविज्ञानं प्रति तस्य महद्योगदानाय भारतस्य प्रतिष्ठितेन **महर्षिबादरायणव्याससम्मानेन** विभूष्यते ।

त्यजेद्धर्मं दयाहीनम् (One should abandon for ever any law which is without compassion.)





हिमाचलप्रदेशस्य मुख्यमन्त्रिण: मान्या:
श्रीजयरामठाकुरमहोदया: विद्यापीठस्य कुलसचिवै:
शैक्षिकसङ्कायप्रमुखै: शिक्षासङ्कायप्रमुखैश्च स्वागतीक्रियन्ते

तेलङ्गाणराज्यस्य संस्कृति-पर्यटन-
देवादाययुवजनवार्ताविभागस्य परामर्शदातार:
श्री के.वी.रमणाचारिमहोदया: कुलपतिभि: अभिवाद्यन्ते

## अमेरिकाया: कार्लिफोनियानगरे त्रिगलनवावधानम्






सविधा इत्यस्या: स्वतन्त्रसंस्थाया: तेलुगुमिसिमिविभागस्य आध्वर्यवे अमेरिकायां कालिफोर्नियानगरस्थे श्रीलक्ष्मीनारायणमन्दिरे तिसृषु भाषासु "त्रिगलनवावधानम्" (व्यावहारिकतेलुगु-साम्प्रदायिकतेलुगु-संस्कृतभाषासु) इति कार्यक्रम: त्रिभि: अवधानिभि: नवांशै: षड्घण्टा: यावत् प्रवृत्त: । कार्यक्रमेऽस्मिन् विद्यापीठस्य शैक्षिकसङ्कायप्रमुखा: केन्द्रसाहित्य-अकादमीपुरस्कारभाज: प्रज्ञाभास्करा: आचार्या: राणीसदाशिवमूर्त्तिमहाभागा: सञ्चालकत्वं निरवहन् ।

## शेमुषीपरिवार:



प्रकाशक:
आचार्य जि.एस्.आर्.कृष्णमूर्त्ति:
कुलसचिव:



सम्पादक:
डॉ.सोमनाथ दाश:
सहाचार्य:, अनुसन्धानप्रकाशनविभाग:

वार्तासङ्कलक:, रागि वेङ्कटाचारी, अतिथि-अध्यापक:

Dear Readers !
Your suggestions are solicited to improve the qaulity of our newsletter.
Please send your views or feed back to the Editor's mail: editorssemushi@gmail.com
Editor SEMUSHI